# भारतवर्षस्य पुनर्निर्माणम्

स्वामि-विवेकानन्दः

प्रकाशकः
**अद्वैताश्रमः**
५-संख्यक-डिहि-एन्टाली-मार्ग-स्थितः
७०००१४-पत्रालयीय-गूढ-संख्यावच्छिन्नः

प्रकाशितम्
स्वामी तत्त्वविदानन्द इत्यनेन
अध्यक्षेण, अद्वैताश्रम इत्यस्य
उत्तराखण्ड-प्रदेशान्तर्गतस्य
चम्पावत्-मण्डलान्तः-पातिनो मायावती-स्थितस्य
(कोलकाता-स्थित-प्रकाशन-विभागात् प्रकाशितम्)

© सर्वस्वत्वं संरक्षितम्

प्रथमं संस्करणम् (वङ्गीयायाम्)
उद्बोधन-कार्यालयतः १९८६-खृष्टवर्षस्य
डिसेम्बर-मासि
अद्वैताश्रम-प्रकाशितम्
प्रथमं संस्करणम् (संस्कृतमयम्)
२०१७-खृष्टवर्षस्य मे-मासि

५०० प्रतयः

ISBN 978-81-7505-468-4

भारतवर्षे मुद्रितम्
टायो प्रोसेस इत्यनेन
कलिकाता-स्थितेन



## उपोद्घातः

देशस्य स्वातन्त्र्य-लाभानन्तर-कालतः अस्माकं युवसु जातेः पुनर्निर्माणाय अत्यन्त उत्साहः परिलक्षितः तथा एतद् अत्यन्तं प्रशंसार्हम्। किन्तु एतत्-पुनर्निर्माण-कर्मणि प्रवृत्तेः प्राग् एव कर्मिणाम् एकः सुस्पष्टो बोध आवश्यको भविष्य-भारतस्य भाव-मूर्ति-विषये। यथा, कश्चन चित्र-शिल्पी सहसा पट-भूमेः उपरि वर्ण-योजनं नारभते। अनया पद्धत्या किमपि रम्यं चित्रं सृष्टं भवितुं नार्हति। शिल्पिना सम्यक् चिन्तनीयम्, तेन किं चित्रम् आलिखितुम् इष्यते; तद्-विषये एकः सुस्पष्टो विचारः तस्य मनसि स्यात् तदैव स तस्य मनोजगतो रूप-कल्पं पट-भूमेः उपरि उपस्थापयितुं शक्नुयात्। तथैव कश्चन अभियन्ता सहसा एकं गृहं निर्मातुं न आरभते। स प्रथमतः अवगन्तुं चेष्टते गृहं किंरूपं स्याद् इति। गृहम् इदं किम् एकस्य विद्यालयस्य कृते, अथवा चिकित्सालय-कृते, शासकीय-कार्यालय-कृते, वसति-कृते वा? ततः प्रयोजनानुसारं स गृहस्य आकार-परिकल्पनं कुरुते, सूक्ष्मातिसूक्ष्म-विषये निश्चयं करोति, अनन्तरं गृह-निर्माणम् आरभते च। युष्माकम् अपि भविष्य-भारतवर्ष-विषये एकः सुस्पष्टो बोधः अपेक्ष्यते ततो यूयं जाति-निर्माण-कर्मणि आत्म-नियोगं कुर्यात। युष्माभिः किम् इष्यते यद् भारतवर्षम् एक-बृहत्-सामरिक-जातितया परिणतं स्यात्? मम निश्चयः अस्ति यद् युष्माभिः तादृशं किमपि न इष्यते, यतः कापि सामरिकी शक्तिः एव दीर्घ-कालं स्थातुं न समर्था आसीत्। दृश्यताम्, हिटलारस्य मुसोलिनेः वा कीदृशी परिणतिः!

तर्हि यूयं किम् आमेरिकाम् इव युष्माकं देशं शिल्पे उन्नतां तथा कृषौ अत्यन्तम् अग्रगताम् एकां धनि-जातिं कर्तुम् इच्छथ?

अस्माकं देशो दरिद्रः, अस्माकं जन-साधारणानां भोजनादि-कृते अस्माभिः सम्पत्तिः अपेक्ष्यते। किन्तु केवलं खाद्यं पानीयं च अस्माकं सर्व-विध-सङ्कटानां समाधानं कर्तुं किं शक्नुयात्? आमेरिका तथा अन्ये उन्नता देशाः तेषां प्रचुर-धनवत्त्वे सत्यपि मानसिकीं शान्तिं तथा यथार्थ-सुखं किं लब्धवन्तः? ते तन्न लब्धवन्तः। पश्यत, तत्-सकल-देशानां तरुणाः, समृद्धि-मध्ये वृद्धिम् आप्ता युवानो युवत्यश्च—तेषां किमपि करणीयं नास्ति इति चिन्तयित्वा हताशाः सन्तो भ्रमन्ति। एषु कतिचन जना अत्यन्तं धनिनः, किन्तु जीवनस्य किमपि निर्दिष्टं लक्ष्यं नास्ति इत्यतः ते भीषण-धन-मान्द्यात् पीड्यन्ते। अस्माभिः सामरिकी शक्तिः अपेक्ष्यते देशस्य स्वतन्त्रता-रक्षार्थम्, प्रतिवेशि-राष्ट्रेषु लुण्ठनं कर्तुं न। अस्माकं निरन्न-जनानां भोजनादि-कृते अस्माकं धनेन प्रयोजनम्, किन्तु एतद् अपि अस्माकं जातेः आदर्शो भवितुं न अर्हति। एतद्-द्वयातिरिक्तम् अस्माकम् अपरम् अपि किञ्चिद् आवश्यकम्। तद् वस्तु किम्, यत् खलु धन-सम्पदा सामरिक-शक्त्या साकम् अस्माकं काङ्क्षितां शान्तिम् अपि समानयेत्।

अहं युष्मान् वच्मि, यूयम् अस्माकं प्राचीनेतिहासं पठित्वा जानीथ—सम्राड् अशोकः, चन्द्रगुप्तः, कणिष्कश्च इत्येषां तथा अन्येषां काले भारतवर्षं शक्त्या सम्पदा शान्त्या कियद् महद् आसीत्। वैदिके तथा बौद्धे युगे अस्माकं निश्चित एव आसीद् महान् आदर्शः, येन भारतवर्षम् अतीते एतावद् महत् कृतम्। किन्तु अस्माकम् एतद् अधःपतनं कुतः संवृत्तम्? अस्माभिः अनुसन्धाय निर्णेयानि अस्माकम् अधःपतनस्य कारणानि। अतो भविष्य-भारतवर्षस्य निर्माणे



वयं तत्-सकलान् आदर्शान् ग्रहीष्यामो ये अस्मान् महतः कृतवन्तः, तथा तान् त्यक्ष्यामो यैः अस्माकम् अधःपतनं साधितम्। अपि च यद् अस्माकं नासीत्, अस्यार्थो विज्ञानं तथा प्रयुक्ति-विद्या तत्-सकलं वयं समाहरेम।

इदानीं वयं विज्ञान-नाम्ना शपथं कुर्मः। वयं ब्रूमहे, एतद् अवैज्ञानिकम्, अयं कुसंस्कारः। वयं ज्ञातुम् अपि चेष्टां न कुर्मः अस्माकं मध्ये महत् किम् आसीद् अपि च यद् अस्मान् जाति-रूपेण विगत-त्रि-सहस्र-वर्षाणि यावद् रक्षितवद् अस्ति। अस्माकम् एतद् अतीतं पूर्णतया अनङ्गीकृत्य पाश्चात्य-भावनायाः पश्चाद् धावनं किं वैज्ञानिकम्? एषा पाश्चात्य-भाव-धारा काल-परीक्षया इदानीम् अपि न परीक्षिता। एतत्-सर्वं सर्वाधिकतया द्वि-शत-वर्ष-प्राचीनं तथा तेषु कतिचन तदपेक्षया अपि अर्वाचीनानि। तद् व्यतिरिच्य अपि एतत्-सकल-भाव-धाराया आदर्शः किं पाश्चात्य-जातेः जीवन-सङ्कटानां समाधानं कर्तुं समर्थः अभूत्? एतेन किं पाश्चात्य-जातयो यथार्थ-सुख-शान्ति-लाभ-समर्था अभवन्? एतद्-विषये ते साफल्यम् अर्जितवन्त इति तु न मन्यते। अतः तत्-सकलादर्शान् अनु युष्माभिः धाव्यते कथम्?

मम तरुणा बान्धवाः, युष्माभिः ज्ञायताम्, वयं मनुष्याः, भगवान् अस्मभ्यं बुद्धिं युक्तिं च यां दत्तवान्, तदुपयोगः अस्माभिः कार्यः। यः कोऽपि आगम्य सप्रसभं किञ्चिद् वदति चेद् एव अस्माभिः युक्तिं वर्जयित्वा गो-गणवत् परिचालितैः न भाव्यम्। तदर्थं युष्माकं समीपे मम उपदेशः—यूयं सर्व-प्रथमम् अस्माकम् अतीत-वर्तमान-विषये सर्वं तथ्यं सङ्गृह्णीत, तत् सकलं पर्यालोचयत तदुपरि च भविष्य-निर्माणं कुरुत। कदापि केवलम् आवेगेन परिचालिता न भवत।

संस्मरणीयं यत् सर्व-प्रथमं चरितेन प्रयोजनम्। सच्चरितं विना कस्मिन्नपि महति कर्मणि सिद्धि-लाभः कर्तुं न शक्यते। महात्म-गान्धी-महोदयं प्रति दृक्पातं कुरु। पश्यत, स कथं तस्य चरित-बलेन समग्रां जातिं परिचालयति स्म तथा अनिच्छन्तम् अपि इंल्याण्ड-देशं बलाद् भारत-देश-त्यागे नियोजितवान्। स एतदर्थं भूशुण्डेः, आणविक-विस्फोटकेत्यादि-सकलस्य च कस्यापि उपयोगं न कृतवान्। अतो यदि युष्माभिः भारतवर्षं बृहद् महत् च कर्तुम् इष्यते, तर्हि सर्व-प्रथमं स्वेषां चरित-निर्माणं कुरुत। ततो विचार्य स्थिरीकुरुत कीदृशं भारतवर्षं यूयं निर्मातुम् इच्छत ततश्च तदनुसारं कर्मणि प्रवृत्ता भवत। एतदर्थं यदि स्वार्थ-त्यागः करणीयः तदर्थम् अपि सन्नद्धैः भाव्यम्। एतादृशाध्ययनस्य कृते स्वामि-पादस्य 'वाणी तथा रचना' एव भवेद् युष्माकं निर्देशिका। एतन्मध्यतो भारतवर्षस्य संस्कृतेः तथा आदर्शस्य महत्तम-रूपं युष्माकम् अग्रत उद्घाटितं स्यात्।

स्वामि-पादस्य 'वाणी तथा रचना' इत्यतः सङ्कलितायाम् एतत्-पुस्तिकायाम् एक-पलकेन प्राप्स्यते—भारतस्य पतन-कारणम्, भारतस्य वर्तमाना स्थितिः तथा तस्य पुनरुत्थानस्य मार्ग-निर्देशः। आशासे अस्माकं देशस्य ये तावद् युवका महतो भारतस्य निर्माणार्थम् उच्चाकाङ्क्षां बिभ्रति तेषां कृते एतत् पुस्तकं साहायकं वितनुयात्।

बेलुड़-मठे<br>
(१९८०) अशीत्युत्तरोनविंशति-<br>
शततमेशवीयाब्दस्य डिसेम्बर-मासस्य<br>
त्रयोविंशे अहनि

(स्वामि-वीरेश्वरानन्दस्य)<br>
अध्यक्षस्य<br>
रामकृष्ण-मठस्य तथा<br>
रामकृष्ण-मिशन् इति सङ्घस्य



## प्रकाशक-निवेदनम्

### (अद्वैताश्रम-पक्षतः)

महतो वेद-पुरुषस्य लीला-भूमिः इयं भारत-भूः शाश्वती इति विदां विश्वासः। परं नीचैर्गच्छत्युपरि च दशा चक्रनेमि-क्रमेण इति महाकवि-भणिति-प्रामाण्यात् नियति-नियमेन क्वचित् क्वचित् क्षणिकं मालिन्यं ताम् आक्रमति। किन्तु विधि-नियोगात् समनन्तरम् एव कोऽपि महापुरुष आविर्भूय क्षालित-कल्मषां तां पुनरपि स्वे महिम्नि समवस्थापयति। एवम् एव भगवता यज्ञ-वराहेण अम्भोधि-तलात् पृथ्वीम् इव स्वामि-विवेकानन्दः पारतन्त्र्यापत्-पयोधौ निमग्नां भारत-भूमिं समुज्जहार, तस्यै नूतन-कान्तिमतीं तनूं प्रादात्। सा हि भास्वती कान्तिः। कान्तिः हि संस्कृत-संस्कृतिः। स्वामि-पादैः उच्चैः उदघोषि—संस्कृतस्य प्रचारम् ऋते, समादरं विना भारतवर्षस्य उद्बोधनं नैव सम्भवेद् इति। तदीय-प्रवचनस्य प्रायः प्रत्येकं पदे एतदभिज्ञानं स्पष्टम्। अतः संस्कृत-प्रचारे समारब्धाध्यवसायैः अस्माभिः उद्बोधन-कार्यालयतः प्रकाशितायाः स्वामि-विवेकानन्दस्य वाणी-सङ्ग्रहात्मिकायाः 'भारतेर पुनर्गठन' इति पुस्तिकायाः संस्कृतानुवादः प्रकाश्यते हृन्मुदे संस्कृत-प्रेमिणाम्, प्रकाशानुमति-प्रदान-हेतोः कार्तज्ञ्यं कार्यालयाध्यक्षेभ्यो विज्ञाप्यते इति शिवम्।

## सूचिपत्रम्


| | |
|---|---|
| उपोद्घातः | ३ |
| प्रकाशक-निवेदनम् | ७ |
| दरिद्र-कुटिरे जातीय-जीवनम् | ९ |
| अस्माकं जातेः महापापम् | १८ |
| जन-जागर्तिः | २७ |
| सर्वदा अग्रसरो भव | ४८ |
| भारतस्य भविष्यम् | ५९ |




# प्रथमः अध्यायः

## दरिद्र-कुटिरे जातीय-जीवनम्

अस्माकं पुण्य-मातृ-भूमौ एव धर्म-दर्शनयोः स्फूर्तिः परिपुष्टिः च। अत्रैव महामहाधर्म-वीरा जनिं लेभिरे। अत्र—केवलम् अत्रैव त्याग-धर्मः प्रचारितः अभूत्; अत्र—केवलम् अत्रैव अति-प्राचीन-कालतः अद्यत्वं यावद् मनुष्याणाम् अग्रत उन्नततमा आदर्शाः संस्थापिताः सन्ति।

तथैव प्रत्येक-जातेः एव एकैक-मुख्यो भावो विद्यते, अन्ये अन्ये भावाः तदनुगताः। भारतस्य मुख्यो भावो धर्मः। समाज-संस्कारः तथा अन्यत् सर्वम् एव गौणम्।

विचक्षण-बुध-दृशा पश्य, न तु महामूढ-दृशा, सर्वं द्रष्टुं शक्ष्यते यत् जातिः जीवन्ती अस्ति, प्राणाः स्पन्दमानाः सन्ति, बाह्यतो भस्मना आवृतमात्राः। अपि च द्रक्ष्यति यत, एतज्जातेः प्राणा धर्मः, भाषा धर्मः, भावो धर्मः; किञ्च तव राजनीतिः, समाज-नीतिः, पौर-व्यवस्था, प्लेग-निरोध-कर्म, दुर्भिक्ष-पीडिताय अन्न-दानम्, इत्येतत् सर्वं यथा-पूर्व-कृतानुसारं विधास्यते, अस्यार्थः केवलं धर्मतः सम्पत्स्यते; अन्यथा तव उच्चैः उत्क्रोशनं मुधैव सम्पत्स्यते!

यूयं धर्मं मूलतया अनालम्ब्य, धर्मम् एव जातीय-जीवनस्य सारम् अकृत्वा राजनीतिम्, समाज-नीतिम् अन्यत् किमपि वा यदि लक्ष्यतया अङ्गीकुरुषे, तर्हि तत्-फलतया यूयं सर्वथा विलयम् एष्यथ।

विश्वेतिहासस्य पर्यालोचनेन एतत् प्रतीयते यत् प्रकृति-नियमानुसारं ब्राह्मणादयः चत्वारो वर्णा यथाक्रमं विश्व-शासनं करिष्यन्ति। विद्यायाम् अविभक्ताधिकारं निर्वहताम् अथवा आयुध-शक्तिं बिभ्रताम्, धन-बलवतां वा कर-गतम् एव अस्तु समाजस्य नेतृत्वम्, तदीय-शक्तेः आकरस्तु सदैव प्रजा-जनाः।

कस्तेषां वन्दारवो येषां रुधिर-स्रावेण मानवजातेः निखिल-समुन्नतिः सम्पन्ना? धर्मवीराः, रणवीराः, काव्यवीराः सर्व-चक्षुर्गोचराः सर्वमान्याः। परं सर्वेषां जुगुप्सिते परिमण्डले, यत्र कस्यापि प्रोत्साहन-वाक् न पदं करोति तादृशे परिमण्डले ये जीवन्ति अनन्त-धैर्यम्, अशेषं प्रेम, निर्भीक-कर्मोद्यमं बिभ्रतः; अस्माकं दरिद्राः तेषां गृहेषु रात्रिन्दिवं स्वेषां कर्म सम्पादयन्ति पूर्णतो नीरवतया, किं तत्र नास्ति वीरत्वम्?

कर्षकाः, चर्मकाराः, खलपू-जनाः तथा तादृशा अन्ये निम्न-जातीया भारतीया भवदपेक्षया अधिकतर-कर्म-सामर्थ्यं तथा आत्म-विश्वासं बिभ्रति। बहु-वर्षाणि यावत् ते नीरवं कर्माणि कुर्वन्तः सन्ति, देशस्य निखिलां सम्पदम् उत्पादयन्तः सन्ति अभियोग-वाचम् अनुच्चार्य। भवेद् वा तैः युष्माभिः इव कानिचन पुस्तकानि नाधीतानि नापि तैः लम्ब-शाट-दृढ-च्छदादि-परिधानेन युक्तं सभ्यत्वम् अधिकृतम् इति। तेन किं स्यात्? परं ते हि सर्वेषु देशेषु जाताः कशेरुकाः। यदि एते निम्न-वर्णीयाः कर्म स्थगयन्ति युष्माभिः अशनं वसनं च प्राप्स्यते? यदि कलिकातायाः खलपू-जना एक-दिवसस्य कृते कर्म स्थगयन्ति तर्हि अनिवार्यतया उद्वेगः समुत्पद्यते। अपि च, यदि ते दिवस-त्रयस्य कृते कर्म-बन्धं कुर्वन्ति सम्पूर्ण-नगरं महामारी-प्रकाशात् जन-शून्यं [illegible] यदि कर्मिणः कर्म स्थगयन्ति तर्हि युष्माकम् अशन-वसनादेः



उपकल्पनम् अपि स्थगितं स्यात्। (परम्) त्वं तान् निम्न-वर्णीय-पुरुषान् मन्यसे आत्म-संस्कृतेः च श्लाघा-परोऽसि?

एते (सामान्य-जनाः) सहस्र-सहस्र-वर्षाणि यावत् पीडनं नीरवं सहमानाः—ततः अपूर्व-सहिष्णुता (तैः) समवाप्ता। अनन्त-दुःख-भोगं कृतवन्तः—ततः प्राप्तवन्तः अचलां जीवन-शक्तिम्। एते मुष्टि-मित-सक्तु-भक्षणतो जगत् परावर्तयितुं समर्थाः। अर्ध-रोटिका-प्राप्त्या त्रैलोक्यम् एतेषां तेजो-धारणे अपर्याप्तं स्यात्। एते रक्त-बीज-प्राणाः। अपि च प्राप्तवन्तः अद्भुतं सदाचार-बलं यत् त्रैलोक्ये दुष्प्रापम्। एतावती शान्तिः, एतावती प्रीतिः, एतावती सन्तुष्टिः, एतावान् रात्रिन्दिवं नीरवं परिश्रमः तथा कार्य-काले सिंह-विक्रमः!

महाकर्म समासाद्यते चेद् अनेके एव वीरा भवन्ति, दश-सहस्र-जन-प्रशंसावसरे कापुरुषः अपि प्राणान् समर्पयति अक्लेशम्, अत्यन्तं स्वार्थपरः अपि निष्कामो जायते; किन्तु अति-क्षुद्रे कर्मणि सर्वैः अज्ञातः अपि तादृशीं निःस्वार्थताम्, कर्तव्य-परायणतां च यः प्रदर्शयति स एव धन्यः। ते यूयं भारतस्य चिर-पद-दलिताः श्रम-जीविनः। युष्मान् प्रणमामि।

अस्माकं साधारण-जना लौकिक-विद्या-विषये अत्यन्तम् अज्ञाः, किन्तु ते अत्युत्तमाः, यतः अत्र दारिद्र्यम् एक-दण्डनीयापराधतया न विविच्यते। एते संघर्ष-परा अपि न। आमेरिकायां तथा इंल्याण्ड-देशे प्रायो मम वसन-कृते साधारण-जनाः क्षिप्ताः सन्तः बहु-वारं मां हन्तुम् एव प्रचेष्टन्ते स्म। परं भारते कस्यापि असाधारण-वसन-कृते साधारण-जनाः क्षिप्ताः सन्तः (तम्) प्रहर्तुम् उद्यता इत्येतद् वचनं कदापि न श्रुतम्। पाश्चात्त्य-देशस्य दरिद्राः पिशाच-प्रकृतयः, तदपेक्षया अस्माकं दरिद्रा जना देव-प्रकृतयः। अत एव अस्माकं कृते

दारिद्र्यावस्थाया अभ्युन्नति-साधनं तदपेक्षया अनायासतरम्। अन्यान्य-विषयेषु अपि अस्माकं साधारणा जना युरोपीय-जनतः सभ्यतराः।

लोका वदन्ति, अस्माकं देशस्य साधारण-जना अत्यन्तं स्थूल-बुद्धयः, ते विश्वस्य कामपि वार्तां न सङ्गृह्णन्ति, नापेक्षन्ते अपि वा। पूर्वं ममापि तन्मतं प्रति एकः पक्षपात आसीत्; परम् इदानीम् अवगच्छामि, काल्पनिक-गवेषणापेक्षया देश-दर्शक-गणैः त्वरित-दृष्ट्या लिखित-पुस्तक-पाठापेक्षया वा साक्षादनुभवः अधिकतया शिक्षाप्रदः। मम स्वकीयानुभवतः अहम् एतत ज्ञानं लब्धवान् यत्, अस्माकं देशस्य साधारणा जना निर्बोधा अपि न अथवा जागतिक-प्रवृत्ति-सङ्ग्रहणे तेषाम् आग्रहो न्यून इत्यपि न; पृथिव्या अन्यान्य-देशस्य जना यथा वार्ताहरणे साग्रहाः, एते अपि तथा।

ब्राह्मणा एव तु धर्म-शास्त्राणि एकाधिकारे स्थापयित्वा विधि-निषेधान् तेषाम् एव कर-गतान् कृतवन्तः; तथा भारतवर्षस्य अन्यान्य-जातीः नीचा इति वदन्तः तासां मनस्सु एतादृशीं मतिं जनयामासुः यत् ते सत्यम् एव हीना इति। त्वया यदि कश्चन जनः अशन-शयनोपवेशनेषु सर्वदैव उच्यते 'त्वं नीचः त्वं नीचः' इति—तर्हि काले तस्य अनिवार्यतया मतिः स्याद् एव, 'अहं सत्य-सत्यम् एव नीचः' इति। आङ्गल-भाषायाम् एतद् उच्यते hypnotise इति, मन्त्रेण मोहनम् इति।

जात्यादि-विषये मम नास्ति कोऽपि पक्ष-पातः। यतः अहं जाने अयं सामाजिको नियमो गुण-कर्म-प्रसूनः।

एतज्जाति-विभाग-विषय एव अवधार्यताम्—संस्कृते जाति-शब्दस्य अर्थः श्रेणी-विशेषः। प्राथमिकतया जाति-शब्दस्य अर्थ



आसीत् प्रत्येकं जनस्य स्वकीय-प्रकृतिः, स्वकीय-विशेषत्व-प्रकाशस्य स्वातन्त्र्यम्। सहस्र-सहस्र-वर्षाणि यावद् अयम् अर्थ एव गृहीत आसीत्।

सत्त्व-रजस्तमांसि यथा सर्वेषु एव सन्ति—किञ्चित् कस्यापि मध्ये न्यूनम्, किञ्चित् कस्यापि मध्ये अधिकम्; तथा ब्राह्मण-क्षत्रिय-वैश्य-शूद्रोचिताः केचन गुणाः सर्वेषु एव सन्ति। परम् एते केचन गुणाः काले काले न्यूनाधिकतां दधते। अपि च काले काले एकैकस्य प्रकाशो जायते। कश्चन जनो यदा वृत्तिं निर्वहति तदा स शूद्रताम् आप्नोति। यदि किञ्चिदर्थोपार्जनाशया वर्तते तदा वैश्यः। अपि च यदा परस्पर-संघर्षादिकं करोति तदा तदन्तः क्षत्रियत्वं प्रकाशते। किञ्च यदा स भगवच्चिन्तायां भगवत्-प्रसङ्गे वा वर्तते तदा स ब्राह्मणः। एक-जातितः अपर-जाति-प्राप्तिः अपि स्वाभाविकी। विश्वामित्रः तथा परशुरामः—एको ब्राह्मणः तथा अपरः क्षत्रियः कथं सञ्जातः?... ब्राह्मण-पुत्र एव ब्राह्मणो भवति इति नास्ति नियमः, तादृश-भावः अत्यन्तं सम्भाव्यते, किन्तु नापि भवितुम् अर्हति।

वर्ण-विभाग-व्यवस्था सभ्यतायाः सोपानं यद् हि मनुष्यं स्वकीय-शिक्षा-संस्कृत्यनुगुणम् उन्नताद् उन्नततरं पदम् आरोपयति। पाश्चात्त्य-देशेषु सर्वत्रैव शक्तिमतो जयः, दुर्बलस्य मृत्युः। भारत-भूमौ प्रत्येकं सामाजिको नियमो दुर्बलस्य अवनार्थम्।

समाजस्य इयं प्रकृतिः एव यत् स आत्मानं बहुषु वर्गेषु विभाजयति; यद् हि यास्यति तद् हि एतद्-विशेषाधिकार-जातम्। वर्णो हि एकः प्राकृतिको नियमः; अहं सामाजिक-जीवने एकं कर्म सम्पादयितुम् अर्हामि, तथा त्वम् अपरम्; त्वम् एकं देशं शासितुम् अलम्। अहम् एकम् उपानद्युगलं संस्कर्तुं शक्नोमि, परं नैतत् तव मत्तो महत्तरत्वे

कारणम्, अपि त्वं मम पादुका-युग्मं संस्कर्तुम् अलम् असि? किमहं देश-प्रशासने समर्थः? अयं कर्म-विभागो नैसर्गिकः। अहम् उपानत्-सीवने दक्षः, त्वं वेद-पाठे धुरीणः असि, परं तेन त्वं मम शिरोपमर्दनं कर्तुं नार्हसि। त्वं हत्यां कुरुषे चेत् कथं प्रशस्यः स्याः, परम् अहम् एकम् आपेल-फलं चोरयामि चेत् कथम् अहम् उद्बन्धनेन मारणीयः स्याम्? एतत् न भवितुम् अर्हति। एतदधिकार-तारतम्यम् उच्छिन्नं स्यात्। यदि त्वं वेदान्तं शिक्षापयसि मत्स्याजीवम्, स वक्ष्यति, अहं त्वद्वद् एव, स्याद् वा त्वम् एको दार्शनिकः, अहं वा धीवरः; परं त्वयि य ईश्वरः अस्ति, मयि अपि स ईश्वरो विराजते। किञ्च, एतद् एव वयं वाञ्छामः—कस्यापि विशिष्टाधिकारो न स्यात्, परं प्रत्येकं जनस्य अभ्युन्नतये अनुरूपः अवसरः स्यात्।

विषयः अयं विशेषेण अवधेयो यद् द्वौ वरिष्ठौ पुरुषौ प्राचीन-भारते लब्ध-जन्मानौ, तौ उभौ एव—कृष्णः तथा बुद्धः—क्षत्रियौ आस्ताम्। एष इतोऽपि अधिकतया अवधेयो विषयो यद् द्वौ एव एतौ देव-मानवौ ज्ञान-द्वारं सर्वेषाम् अग्रत एव मोचयामासतुः, स्त्री-पुरुष-जाति-लिङ्ग-निर्विशेषम्।

जाति-भेद-प्रथा शश्वद् एव अत्यन्तं नमनशीला आसीत्, क्वचित् क्वचित् संस्कृति-मान-दण्डे अधोभागस्थाया जातेः अभ्युन्नति-विधानार्थम् एषा किञ्चिद् अधिकतया अवनता भवति स्म। न धन-सम्पद्भ्याम् असि-लतया वा—आध्यात्मिकतया नियन्त्रितेन शोभितेन विचारेण च एव एषा आर्य-जातिः न्यूनतया तात्त्विक-दृष्ट्या अखिलं भारतवर्षम् (धियः) शासने स्थापयति स्म। ...प्रत्येकं देशे सर्वोत्तम-सम्मानना क्षत्रियेषु असि-पुरुषेषु विद्यते। ...भारतवर्षे सर्वोत्तम-सम्मानना शान्त-पुंसि—श्रमणे, ब्राह्मणे, भागवत-पुरुषे महापुरुषेषु



च विद्यते। ...सर्वेषु देशान्तरेषु वर्ण-नियमः स्वीकरोति यत् प्रत्येकं स्त्री-पुंसौ जाति-निर्धारणे अन्योन्यानपेक्षौ स्वयं सम्पूर्णौ। सम्पत्तिः, शक्तिः, बुद्धिः तथा सौन्दर्यं प्रत्येकं जनं जाति-प्राप्त-मर्यादाम् अत्येतुं तथा यत्र कुत्रापि आरोढुं सामर्थ्यं विदधति। ...अत्रापि प्रत्येकस्य एकस्मात् निम्न-वर्णाद् उन्नततरम् उन्नततमं वा पदम् आप्तुम् अवसरो विद्यते; परन्तु एतत्-परार्थ-वादस्य जन्म-भूमौ अस्यां प्रत्येकं जनः तस्य सकल-स्वजातीय-सहित एव उन्नतिम् आप्नुयात्।

यथार्थतः को नाम जाति-विभाग इति कोटिषु एकः अपि अवगच्छति न वेति सन्देहः अस्ति। पृथिव्यां न कोऽपि देशो वर्तते यत्र जातिः नास्ति। भारतवर्षे जाति-विभागतो वयं तत् पदं प्राप्नुमो यत्र जातिः न विद्यते। जाति-विभागस्य भित्तिः सर्वथा तस्मिन् मूलीभूते आदर्शे वर्तते। भारतवर्षे एतस्य जाति-भेद-परिकल्पनस्य लक्ष्यं हि प्रत्येकस्य ब्राह्मणत्वापादनम्—(यतो हि) मनुष्य-जातेः ब्राह्मण आदर्शः। यदि त्वया भारतवर्षस्य इतिहासः अधीयते तर्हि द्रक्ष्यते यद् अत्र शश्वद् एव निम्न-जातीयानाम् उन्नमनार्थं प्रयासः संसाधित इति।

जाति-विभाग एका सामाजिकी प्रथा, तथा च अस्माकं सर्वे महान्तो देशिका एतस्य भञ्जनाय यत्नं कृतवन्तः। बौद्ध-धर्मात् प्रारभ्य प्रत्येकं सम्प्रदायो जाति-प्रथाया विरुद्ध-प्रचारं कृतवन्तः, परन्तु तेन च प्रति-वारम् एतत् निगडनं केवलं दृढीभूतम्। जाति-भेदः अपि वस्तुतो भारतवर्षस्य राजनीतिक-व्यवस्थाया बाह्य-प्रकाशः। असौ एको वंशानुक्रमिको वाणिज्य-समवायः।

अस्माकं जाति-विभागः तथा अन्ये धर्म-नियमाः... निखिल-हिन्दु-जाते रक्षार्थम्... आवश्यका आसन्। यदा एतद् आत्म-रक्षण-प्रयोजनं समाप्तं स्यात् तदा तत्-सकलम् अपि स्वभावतो लयं प्राप्स्यति।

अस्मद्देशे यो जाति-भेदो वर्तते स पाश्चात्त्य-प्रदेशे आमेरिकायां च यो जाति-भेदो विद्यते तदपेक्षया वरम्। अहम् एवं न वच्मि यद् एतत् निश्चप्रचं पूर्णतया हिताय एव इति। यदि जाति-भेदो न अभविष्यत्, तर्हि यूयं क्व तिष्ठेत? यदि जाति-भेदो न वर्तेत तर्हि युष्माकं शिक्षा तथा अन्यत् सर्वं क्व स्यात्? यदि जाति-विभागो न अभविष्यत् तर्हि पाश्चात्त्य-देशीयानाम् अध्ययनार्थम् एतत्-सकल-शास्त्रं क्व अभविष्यत्? मोहम्मदीयाः तु सर्वं खण्डशो विनाशितम् अकरिष्यत्। क्व त्वं पश्यसि भारतीय-समाजः स्थेम्ना तिष्ठति? अयं सर्वदैव चलन् अस्ति। क्वचित् क्वचिद् यथा वैदेशिक-पारतन्त्र्य-समये एतत् चलनम् अत्यर्थं मन्दं जातम्, कालान्तरे तु द्रुततरम्। एतद् एव अहं वच्मि मम स्व-देशजेभ्यः। अहं तान् न दूषयामि। अहं तेषाम् अतीते दृक्पातं करोमि। किञ्च पश्यामि यत्, (तत्-परिस्थितौ) देश-काल-स्थिति-पर्यालोचनेन कापि जातिः इतः अधिकतर-गौरवमय-कृतिं कर्तुं समर्था न अभविष्यत्। अहं वच्मि, युष्माभिः सम्यक् कृतम्, अहं केवलं तान् वच्मि भूयसा अपि महत्तरं कर्तुं यतध्वम् इति।

जाति-भेदः सदैव परिवृत्ति-शीलः, धार्मिक-क्रियाः सदैव परिवर्तन-शीलाः! केवलं मूल-तत्त्वम्, आदर्शो न परिवर्तते।

जाति-भेदो न कदापि अपेयात्; परम् अन्तरा अन्तरा तस्य अभिनव-मुषायाम् आवर्जनं विधातव्यम्। प्राक्तनाकार-मध्ये एव नूतन-नूतन-द्वि-शत-सहस्र-निर्माणोपयोगि जीवितम् आविष्करणीयम्। जाति-विभागस्य विनाश-चिकीर्षा हि अशेषेण निर्बुद्धिता एव। नूतन-पद्धतिः हि प्राक्तनस्य विवर्तनम्।

समग्रं विश्वम् अस्माकं मातृ-भूमेः यद् आधमर्ण्यं बिभर्त्ति तद् हि प्रचुरम्। यदि जात्या सह जातेः तुलना क्रियते तर्हि जगत्याम्



अस्यां न कापि तादृशी जातिः वर्तते यतो विश्वम् इदम् एतावद् अधिकम् आधमर्ण्यं भजते यादृश सहिष्णु-हिन्दु-जातेः। प्राचीने तथा आधुनिके समये महतः सत्यस्य तथा शक्तेः बीजानि बहिः विक्षिप्तानि जातीय-जीवनस्य प्रसरद्भिः ऊर्मिभिः; परम् अयि मित्राणि, एतद् अपि अवधेयं यत् तत्-सकल-भावाः प्रसरं गताः सदैव रण-दुन्दुभेः ध्वानेन तथा रण-वेश-सज्जित-सैन्यानां पाद-विक्षेपेण समम्। रक्त-प्लावनेन अभिषिच्य लक्षशो नर-नारीणां रुधिर-कर्दम-मध्यत एव ते सर्वे भावा अग्रसरणीया आसन्। ...मुख्यतः अनया पद्धत्या एव जात्यन्तरैः पृथिवी शिक्षापिता; परं भारतं वर्षाणां सहस्राणि निरुद्वेगं ससुखं वर्तते। ...इतोऽपि प्राचीन-काले य इतिहासेनापि न विधृतः, किंवदन्ती अपि यत् सुदूरातीतस्य घनान्धतमसि दृक्पातं कर्तुं न साहसं करोति— तदतीत-प्राचीन-कालत इदानीन्तन-कालं यावद् अनवरत-भाव-तरङ्गा भारततः सम्प्रसारिताः, परं प्रत्येकं तरङ्ग एव पुरतः शान्तिं तथा पृष्ठत आशीर्वाणीम् आदाय उपसर्पणम् अकरोत्।

अत एव हिन्दु-जना यावद् एव आधिक्येन तेषाम् अतीत-पर्यालोचनं विधास्यन्ति तावद् एव तेषां भविष्यं गौरवमयं भविष्यति; अपि च यः कोऽपि एतद् अतीतं प्रत्येकस्य अग्रतः प्रकटयितुं प्रचेष्टते स एव स्व-जातेः परम-हित-विधायी। अस्माकं पूर्व-पुरुषाणां रीतयो मन्दा आसन् इत्यतो भारतवर्षस्य अवनतिः जाता इति न; एतस्य अवनमनस्य कारणम्, तासां नीतीनां यादृशी न्यायानुसारिणी परिणतिः समुचिता आसीत्, तत्र प्रतिबन्ध-समुपजपनम्।

## द्वितीयः अध्यायः

### अस्माकं जातेः महापापम्

मन्मते देशस्य साधारण-जनानाम् अवमाननम् एव अस्माकं प्रबलं जातीय-पापं तथा तद् एव अस्माकम् अवनतेः अन्यतमं कारणम्।

भारते महापाप-द्वयम् अस्ति—पद्द्याम् अबलानाम् विदलनम्, तथा जाति-व्याजेन दीनानां पेषणम्।

युष्मद्-देशीय-मानवान् प्रति सकृद् दृक्पातं कुरु रे—मुखे मालिन्यस्य छाया, हृदि साहसोद्यम-राहित्यम्, पृषोदरत्वम्, निर्बल-पाणि-पादत्वम्, भीरुता कापुरुषत्वं च!

ये कुटिर-वासिनः, ते विस्मृतात्मीय-सत्ताका विस्मृत-मनुष्यत्वाश्च। अस्मिन् भारत-भूमण्डले मानवस्य आत्म-स्वत्व-बुद्धेः प्रस्फुरणं नियतम् अवदमितम् अस्ति। हिन्दु-महम्मदीय-खृष्ट-भक्ताः—इत्येषां प्रत्येक-पद-तलेन पिष्यमाणानां तेषां मनस्सु एषा मतिः समुदभूद् यत्, धनि-पद-तले निष्पेषण-निमित्तम् एव तेषां जन्म।

अमी ये कर्षकादयः तन्तुवायाः च भारतवर्षस्य नगण्य-मनुष्याः—विजाति-विजित-स्वजाति-निन्दिता हीन-जातिजाः—ते एव आवहमान-कालं व्याप्य नीरवं कर्म कुर्वन्तः सन्ति तेषां परिश्रम-फलम् अपि ते न लभन्ते।

येषां शारीर-परिश्रमेण ब्राह्मणस्य आधिपत्यम्, क्षत्रियस्य ऐश्वर्यं तथा वैश्यस्य धन-धान्यं सम्भवति, ते क्व? समाजस्य ये





मुख्याङ्गतां बिभ्राणा अपि सर्व-देशेषु सर्व-कालेषु 'जघन्य-प्रभवो हि सः' इत्यभिहिताः तेषां का वार्ता? हे भारतस्य श्रमजीविन्! तव नीरवस्य अनवरतं निन्दितस्य परिश्रमस्य फलतया बाबिल-इरान-आलकसन्द्रिया-ग्रीस-रोम-भिनिस-जेनोया-बोग्दाद-समरकन्द-स्पेन-पोर्तुगाल-फरासी-दिनेमार-ओलन्दाज-आङ्गलानां क्रमान्वयेन आधिपत्यम् ऐश्वर्यं च सञ्जातम्। परं त्वम्?—कश्चिन्तयति एतद्-विषये।

जीवन-संग्रामे सर्वदा व्यापृततया निम्न-जातीय-जनानाम् एतावत्-काल-पर्यन्तं ज्ञानोन्मेषो न सञ्जातः; एते मानव-बुद्धि-नियमित-यन्त्रवद् आनुरूप्येण एतावत्-काल-पर्यन्तं कर्म कुर्वन्त आसन्, तथा बुद्धिमन्तः चतुरा जना एतेषां परिश्रमस्य तथा उपार्जनस्य सारांशं गृहीतवन्तः; सर्व-देशेषु एव एतादृशं सम्पन्नम्। किन्तु इदानीं न पुनः स कालो विद्यते। इतर-जातीयाः क्रमेण तद्-विषयं बोद्धुं शक्नुवन्ति तथा तद्-विरोधितया सर्वे संहत्य दण्डायमानाः सन्तः स्वेषां न्याय्य-प्राप्यम् आदातुं दृढ-प्रतिज्ञाः सञ्जाताः। युरोप-आमेरिकाणाम् इतर-जातीया जागरिताः सन्तः तत्-सङ्गामं पूर्वत आरब्धवन्तः। भारते अपि तस्य लक्षणं दृश्यते, निम्न-जातीय-जनानां मध्ये इदानीम् एतावन्तो ये कर्म-विराम-प्रतिवादा भवन्ति तेनैव तद्-विषयः अवगम्यते। इदानीं सहस्र-कृत्वः चेष्टया अपि भद्र-जातीया निम्न-जातीयान् अवदमयितुं न शक्ष्यन्ति। इदानीम् इतर-जातीयानां न्याय्याधिकार-प्रापणे साहायक-विधानेन एव भद्र-जातीयानां कल्याणं भवेत्।

ये लक्ष-लक्ष-दरिद्र-निष्पेषित-मनुजनु-हृदय-रुधिर-धारया समर्जितेन अर्थेन शिक्षिताः सन्तः तथा विलासितायाम् आकण्ठ-निमज्जिताः सन्तः सकृद् अपि अमीषां विषये चिन्तयितुम् अवसरं न प्राप्नुवन्ति—

ते मया विश्वास-घातका इति अभिधीयन्ते। कुत्र इतिहासस्य कस्मिन् युगे धनिनः तथा अभिजाताः, पुरोहिताः तथा धर्म-ध्वजिनो दीन-दुःखिनां कृते चिन्तां कृतवन्तः? परम् एषां निष्पेषण-विधौ एव तेषां शक्तेः प्राणाः।

भारतस्य निखिल-दुर्दशा-मूलम्—जन-साधारणस्य दारिद्र्यम्। पुरोहित-शक्त्या तथा पारतन्त्र्येण ते शत-शत-शताब्दी-कालं व्याप्य निष्पेषिता भवन्ति, अन्ततः तैः विस्मृतं ते अपि मनुष्या अपि इति। अस्माकम् अभिजात-पूर्व-पुरुषा देशस्य साधारण-जनान् पद-दलितान् कर्तुम् आरेभिरे—क्रमशः ते पूर्णतया असहायाः संवृत्ताः; अत्याचारेण एते दरिद्रा जनाः क्रमशो विस्मृतवन्तो यत् ते मनुष्या इति। भारतवर्षस्य यः सर्वनाशः सञ्जातः तस्य मूलं कारणं तत्—राज्य-शासनस्य तथा दम्भस्य बलेन देशस्य निखिल-विद्या-बुद्धीनाम् एक-मुष्टिमेय-जन-गण-मध्ये आबन्धनम्। भारतस्य दरिद्राणाम्, भारतस्य पतितानाम्, भारतस्य पापिनां सहायकं किमपि मित्रं नास्ति। स यावन्तम् एव प्रयत्नं करोतु नाम, तस्य उत्थानस्य उपायो नास्ति। ते प्रतिदिनं निमज्जन्ति। राक्षसवत् नृशंस-समाजः तेषाम् उपरि क्रमेण यम् आघातं विदधाति तद्-वेदनां ते निश्चयेन अनुभवन्ति किन्तु ते न जानन्ति कुतः अयम् आघात आगच्छति इति। शत-शत-शताब्दी-कालं यावत् ते निरुपायाः सन्तः केवलं काष्ठ-खण्डनं कृतवन्तः तथा जलाहरणं कृतवन्तः। क्रमशः तेषां मनसि अयं विश्वासः सञ्जातो यत् ते भृत्याः सन्तो जाताः—काष्ठ-च्छेदनाय तथा जलाहरणाय एव तेषां जन्म इति। अस्माकं देशे—वेदान्तानाम् एतद्-देशे—वेदान्तानाम् एतज्जन्म-भूमौ साधारण-जनाः शत-शत-शताब्दी-कालं यावद् एवं माया-चक्र-पातिताः सन्त एवं हीनम्मन्यतां प्रापिताः। तेषां स्पर्शे अशौचम्,



तैः सह वासे अशौचम्। तान् प्रति उच्यते, 'नैराश्य-तमसि युष्माकं जन्म—तिष्ठत चिराय एतस्यां नैराश्य-तमिस्रायाम्' इति। फलम् एतत् जातं यत् साधारण-जनाः क्रमशो निमज्जन्ति, गहन-तमसो गहनतम-तमसि निमज्जन्ति, मनुष्य-जातेः यावद् अपकृष्टावस्था-प्राप्तिः सम्भवेद् अन्ततः तावत् पर्यन्तम् उपगमनं संवृत्तम्।

अस्माकं देशः सर्वापेक्षया अधमः कथम्, शक्ति-हीनः कथम्?—शक्तेः अवमानना तत्र इत्यतः। स्मृत्यादि-विरचनेन नियम-नीति-द्वारा बन्धनं विरच्य एतद्-देशीय-पुरुषा महिला-जनान् पूर्णत उत्पादन-यन्त्रत्वेन परिणामितवन्तः। अस्माकं दशोन-वत्सरीया बालिका मातरः!!! प्रभो, इदानीं बोद्धुं शक्नोमि। अयि भ्रातः, 'यत्र नार्यस्तु पूज्यन्ते रमन्ते देवताः' इति वृद्ध-मनुना निगदितम्। वयं महापापिनः; स्त्री-लोकान् प्रति घृण्य-कीटाः, नरक-मार्ग इत्यादि ब्रुवन्तः अधोगतिं सम्प्राप्ताः। तात, खतल-पाताल-भेदः!! 'याथातथ्यतोऽर्थान् व्यदधात्' (यथायथतया कर्म-फलं विदधाति)। प्रभुः किं निर्युक्तिक-वचसा प्रतार्यते? प्रभुणा अभाणि—'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी' (त्वम् एव पुरुषः, त्वम् एव बालकः तथा त्वम् एव बालिका) इत्यादि। किञ्च वयं वदामः—'दूरम् अपसर रे चण्डाल' 'केनैषा निर्मिता नारी मोहिनी' इत्यादि।

इयं जातिः मज्जति। लक्षशो जनानाम् अभिशापा मस्तके सन्ति। नित्य-प्रवाहितायाम् अमृत-नद्यां पार्श्वतो वहन्त्याम् अपि तृष्णा-समये येभ्यो वयं पयः-प्रणाल्या जलं पातुम् अयच्छाम, पुरतो भूयो भोज्य-सत्त्वे यान् वयम् अनशनेन मरणे प्रचोदयामास्म, लक्ष-लक्ष-जनाः—यान् वयम् अद्वैत-वादस्य वार्ताम् उक्तवन्तः, किन्तु आप्राण-पातं यान् प्रति घृणां कृतवन्तः, येषां विरोधितया वयं लोकाचार-मत-वादस्य

आविष्कारं कृतवन्तः, यान् प्रति अस्माभिः मुखेन उक्तम्—सर्वे एव समानाः, सर्वे एव तद् एकं ब्रह्म, किन्तु तस्य कर्मणा सूपपादनस्य लेशतः अपि चेष्टां न कृतवन्तः।

हिन्दु-धर्म इव नान्यः कोऽपि धर्म एव एतावद् उच्चैः मानवात्मनो महिम-प्रचारं न करोति, पुनः हिन्दु-धर्मो यथा पैशाचिक-भावेन दरिद्राणां तथा पतितानां कण्ठे पाद-पातं करोति, जगति नान्यः कोऽपि धर्म एवं करोति। इदानीं क्व धर्मः? केवलं स्पर्श-विचारः—मां मा स्पृश, मा स्पृश इति। युष्माभिः ते न स्पृश्यन्ते, 'अपसर अपसर' इति कुरुथ। किं वयं मनुष्याः?

हे प्रभो, कदा मनुष्या अपर-मनुष्यं भ्रातृवद् द्रक्ष्यति?

धर्मे जाति-भेदो नास्ति; जाति-भेदः केवलं सामाजिकी व्यवस्था; अतो धर्मो न दूषणीयः, लोका एव दूषणीयाः।

साधारण-मनुष्याः तदा धर्मस्य प्राण-हीनाचारानुष्ठानेन क्लान्ताः तथा दार्शनिक-व्याख्यायां कौटिल्येन विभ्रान्ताः; अत एव ते वृन्दश एभिः जड-वादिभिः सह योग-दानं कृतवन्तः। श्रेणी-सङ्कटस्य सूचना तत्-कालात् प्रभृति एव, तथा भारत-भूखण्डे आनुष्ठानिक-धर्म-दार्शनिकता-जड-वाद इत्येषां मध्ये त्रिमुख-विरोधः समारब्धः, सः अद्यावधिः अमीमांसित एव अस्ति।

अवश्यम् एव जाति-धर्म विलयं गतः। अत एव युष्माभिः यो जाति-धर्म इत्युच्यते स यथार्थतया विपरीत एव। प्रथमतः पुराण-ग्रन्थादीन् सम्यक् पठ, तदैव बोद्धुं शक्ष्यसि यत्, शास्त्रेण यो जाति-धर्मः अभिहितः, स सर्वत्रैव प्रायो लोपं गतः।

परं भारतस्य पतन-कारणं किम्? जाति-विषये एतादृशस्य



भावस्य परिवर्जनम्। यथा गीतायाम् उक्तं जाति-नाशे सति जगद् अपि विनश्येत्।...आधुनिक-वर्ण-विभागः प्रकृत-जाति-नियमो न, परं स जातेः उन्नतेः प्रतिबन्धकः। तेन यथार्थतया एव जातेः विचित्रतायाः स्वाधीन-गतिः अवरुद्धा जाता। प्रत्येकं हिन्दु-जन एव जानाति यत्, ज्योतिषिणो बालक-बालिकानां जन्म-मात्रम् एव जाति-निर्णयं कर्तुं प्रचेष्टन्ते। सा एव प्रकृत-जातिः—प्रत्येकस्य व्यक्ति-सत्ता; ज्योतिष-शास्त्रेण एतत् स्वीकृतम्। एतस्या यदि पुनः पूर्णतया प्रचलनं भवति तदैव अस्माकम् उत्थानं सम्भवेत्। एतस्य वैचित्र्यस्य तात्पर्यं वैषम्यम् अथवा कोऽपि विशेषाधिकारो न। प्राण-हीनः अभिजातः अथवा फलैक-मात्र-प्रेप्सवो जन-सङ्घा एव जाति-प्रतिबन्धकाः—सा न जातिः। जातिः स्वकीय-प्रभावं विस्तारयतु, जातेः मार्गे ये केचन विघ्नाः सन्ति सर्वे विध्वस्ताः सन्तु—तदैव अस्माकम् उत्थानं भविष्यति।

ये वदन्ति, अज्ञेभ्यो दरिद्रेभ्यो वा स्वातन्त्र्ये प्रदत्ते अस्यार्थः तेषां शरीर-धनादि-विषये तेभ्यः पूर्णाधिकारे दत्ते तथा तेषां सन्तानानाम् अभिजात-धनिक-जन-सन्तानवत् ज्ञानार्जनस्य तथा स्वीयावस्थायाः समुन्नयन-विधानस्य कृते समानावकाशे सति ते उच्छृङ्खला भविष्यन्ति, ते किं समाजस्य कल्याण-कृते वदन्ति अथवा स्वार्थान्धाः सन्तो वदन्ति?

पौरोहित्यम् एव भारतस्य सर्व-नाशस्य मूलम्। निज-भ्रातरम् अवनमितं कृत्वा मनुष्यः स्वयं किं न अवनतः स्थातुम् अर्हति?... को जन आत्मनः किमपि अनिष्टम् अकृत्वा अपरस्य अनिष्टं कर्तुं शक्नोति? एतेषां ब्राह्मणानां क्षत्रियाणां च अत्याचार-समष्टिः चक्र-वृद्धि-नियमेन तेषाम् एव उपरि प्रत्यावर्तिता, एतत्-सहस्रवर्ष-व्यापि-कैङ्कर्यस्य तथा अपमानस्य अनिवार्य-कर्म-फलम् एव ते भुञ्जते।

ये दरिद्राणां शोणित-शोषणं कृतवन्तः, तेषाम् अर्जितेन अर्थेन स्वयं शिक्षा-लाभं कृतवन्तः, किञ्च, येषां शक्ति-प्रतिपत्तेः सौधं दरिद्राणां दुःख-दैन्य-भित्तिकम्—काल-चक्रस्य आवर्तनेन सहस्रशः तज्जना एव दास-रूपेण विक्रीताः सञ्जाताः; तेषां स्त्री-कन्यानां मर्यादा-हानिः सञ्जाता तथा विषय-सम्पत्तिः निखिला एव विलुण्ठिता समभूत्। विगत-सहस्र-वर्षाणि यावद् एतद् एव प्रचलितम्।

अपि च एतस्य मूलीभूतं किमपि कारणं नास्ति इति भवान् मनुते?

नीच-जातीया युष्माकं चिर-कालीन-पीडनेन सर्वदैव पाद-पादुका-प्रहारं समवाप्य पूर्णतो मनुष्यत्वं हारयित्वा वृत्त्या भिक्षुकाः संवृत्ताः। तत्-सकल-जातीया अस्माकं शिक्षा-कृते राजस्व-रूपेण मुद्रां दत्तवन्तः। अस्माकं धर्म-लाभार्थं शारीरिक-परिश्रमेण बृहद्-बृहन्मन्दिरं निर्मितवन्तः। किन्तु एतत्-सकल-विनिमयेन ते चिर-कालम् एव पदाघातं प्राप्तवन्तः।

यदि कस्यापि अस्माकं देशे नीच-कुले जन्म भवति, तस्य न कापि आशा वशिष्यते, स गतः।

...द्रक्ष्यसि—एहि...पौरोहित्यस्य अत्याचारो भारतवर्षस्य यत्र सर्वापेक्षया अधिकः, तस्मिन् त्रिवाङ्कुरे, यत्र ब्राह्मणा निखिल-भूमेः स्वामिनः...तत्रत्या एक-चतुर्थांशा जनाः खृष्टीयाः सञ्जाताः।

एतत् पश्य भोः—हिन्दूनां सहानुभूतिम् अनवाप्य माद्राज-स्थले सहस्रशः पारिया-जनाः खृष्टीयाः सञ्जायन्ते। नैवं मन्यस्व केवलम् उदर-कृते खृष्ट-धर्मं स्वीकुर्वन्ति, अस्माकं सहानुभूतिम् अनवाप्ता इत्यतः।

भारतवर्षे दरिद्राणां मध्ये महम्मदीयानाम् एतावत् संख्याधिक्यं



कथम्? एतद् भाषणं मौर्ख्यं सूचयति यत्, असिना ते बलाद् धर्मान्तरं ग्राहिताः। ...वस्तुतो भू-स्वामिनां पुरोहितानां च कवलात् परित्राणं लिप्सव एव ते धर्मान्तरं स्वीचक्रुः। अतस्तदर्थं वङ्गदेशेषु, यत्र भू-स्वामिनां विशेषेण संख्याधिक्यम्, तत्र कृषक-सम्प्रदाय-मध्ये हिन्दु-जनापेक्षया महम्मदीयानाम् एव संख्याधिक्यम्।

खलपू-जनानां तथा पारिया-जातीयानां साम्प्रतिकं यद् अधःपतनं तदर्थं के अभियोज्याः? के एतदर्थं दूषणीयाः? तदा प्रति-वारम् एव मया एतद् उत्तरं प्राप्यते यत्, एतदर्थम् आङ्गलीया न अभियोज्याः; वयम् एव अस्माकं दुर्दशाया अवनतेः क्लेशस्य च कृते अभियोज्याः—केवलं वयम् एव अभियोज्याः। हिन्दु-धर्मान्तर्गता आत्माभिमानिनः केचन भण्डाः 'पारमार्थिक-व्यावहारिकाभिधानाभ्याम्' अभिहिताभ्यां द्वाभ्यां मताभ्यां सर्वथा पीडनस्य आसुरिक-यन्त्रं क्रमेण आविष्कुर्वन्तः सन्ति।

सर्वे एव चित्कुर्वन्ति, वयम् अत्यन्तं दीनाः, किन्तु भारतवर्षस्य दरिद्राणां साहायक-विधानार्थं कियत्यः संस्थाः सन्ति? कति जनानां लक्षशः अनाथानां कृते प्राणाः क्रन्दन्ति? हे भगवन्, किं वयं मनुष्याः! अमी ये पशु-सदृशा शौण्डिक-शव-दाहिनो युष्माकं गृहं परितः सन्ति तेषाम् उन्नति-कृते युष्माभिः किं क्रियते? तेषां मुखे एक-ग्रास-मितान्न-दानार्थं किं कृतम् इति वक्तुं शक्नुथ वा?

शुक-पक्षिवद् भाषणम् अस्माकं स्वाभाविकं संवृत्तम्—आचरणे वयं पश्चाद्वर्तिनः। एतस्य कारणं किम्? शारीर-दौर्बल्यम् एव अस्य हेतुः। अस्माकं शारीर-शक्ति-मान्द्यम्—एतत् कायिक-हैन-बल्यम् अस्माकं प्राय एक-तृतीयांश-दुःख-कारणम्। वयम् अलसाः, वयं

कर्म कर्तुं न शक्नुमः; वयं संहता भवितुं न शक्नुमः; वयं मिथो न प्रीणीमहे; वयम् अत्यन्त-स्वार्थ-पराः; वयं त्रयः संहताः चेद् एव मिथो जुगुप्साम् आचरामः, ईर्ष्यामः।

युष्माकं जाति-मध्ये संहति-शक्तेः पूर्णतः अभावः। अयम् एकः अभाव एव निखिलानर्थ-कारणम्। पञ्च जना मिलित्वा एकं कर्म कर्तुं पूर्णत एव असम्मताः। सङ्घ-जीवनस्य कृते प्रथमम् आवश्यकं यत् तद् हि आदेशानुपालनम्।

अस्माकम् एको दोषः अत्यन्तं प्रबलः—प्रथमत अस्माकं दौर्बल्यम्, द्वितीयतो घृणा—हृदयस्य शुष्कता। लक्षशो मतानि व्याहर्तुं शक्नुथ, कोटिशः सम्प्रदायान् निर्मातुं शक्नुथ, किन्तु यावत् न तेषां दुःखं प्राणैः अनुभवसि, वेदोपदेशानुसारं यावत् न जानीषे यत्, ते तव शरीरस्य अंशाः, यावत् न यूयं तथा ते धनि-दरिद्र-साध्वसाधवः सर्वे एव तस्य अनन्तस्य अखण्ड-रूपस्य—यद् युष्माभिः ब्रह्म इति अभिधीयते, तस्य अंशीभवन्ति, तावत् किमपि न स्यात्।

# तृतीयः अध्यायः

## जन-जागर्तिः

युष्मद्-देशस्य जन-साधारणा एक-बृहन्निद्राच्छन्न-जल-जन्तुः इव! यूयं किम् एतन्मृत-जड-पिण्डाभ्यन्तरे, येषाम् अन्तःस्था साधू-बुभूषा अपि पूर्णतो नष्टा, ये च भविष्यदभ्युदय-विषये पूर्णतो निश्चेष्टाः, ये तेषां हितैषिणाम् उपरि आक्रमणं कर्तुं सदा सन्नद्धाः, एतादृश-शव-मध्ये प्राण-सञ्चारं कर्तुं शक्नुथ? यूयं किम् एतादृशस्य चिकित्सकस्य आसनं स्वीकर्तुं शक्नुथ, य एकस्य बालकस्य कण्ठे औषधम् आवर्जितुं चेष्टमानः अस्ति, इतो बालकः क्रमेण पदम् आस्फालयन् पदाघातं करोति तथा औषधं न सेविष्य इति चित्कुर्वन् अस्थैर्यम् आरचयति?

जापान-देशे अश्रौषं तद्-देशीय-बालिकानाम् अयं विश्वासो यत्, यदि क्रीडा-पुत्तलिकाः प्रति हार्दिकः प्रणयः कर्तुं शक्यते, सा जीविता सञ्जायते।...ममापि विश्वासो यत्, यदि कोऽपि एतेषु हत-श्रीकेषु विगत-भाग्येषु लुप्त-बुद्धिषु पर-पद-विदलितेषु चिर-बुभुक्षितेषु कलह-शीलेषु तथा परश्री-कातरेषु भारत-वासिषु आप्राण-प्रीतिं बिभर्ति, तर्हि भारतं पुनः जागृयात्।

अस्माकं जातिः स्वकीय-वैशिष्ट्य-हीना संवृत्ता, तदर्थम् एव भारतस्य एतावान् क्लेशः। तज्जातीय-विशेषत्वस्य विकाशो यथा स्यात् तथा विधातव्यम्—नीच-जातेः उद्बोधनं कर्तव्यम्।

भारतम् उद्बोधनीयम्, दीनाः प्राशनीयाः, शिक्षा-प्रसारो विधातव्यः,

तथा पौरोहित्य-रूपं पापं दूरीकर्तव्यम्। भूयोऽपि खाद्यम्, भूयोऽपि सुयोजनम् अपेक्षितम्।

आदौ कूर्मावतारस्य पूजनम् अपेक्षितम्—उदरः अस्ति स कूर्मः। अयम् आदौ परितृप्तो न भवति चेत् तव धर्म-कर्मोपदेशं कोऽपि न स्वीकरिष्यति। (अपि न पश्यसि), उदर-चिन्तया एव भारतम् अस्थिरम्! धर्म-वचन-श्रावणं कर्तव्यं चेद् आदौ एतद्-देशीय-जनानाम् उदर-चिन्ता दूरीकरणीया। अन्यथा केवलं प्रवचनेन विशिष्टं फलं किमपि न स्यात्।

आदौ अन्न-संस्थानं विधातव्यम्, ततो धर्मः। दरिद्रा जना अनशनेन म्रियन्ते, वयं तेभ्यः अतिरिक्तं धर्मोपदेशं दद्मः। मत-मतान्तरैः तु उदर-पूर्तिः न भवति खलु!

अद्य अर्ध-शताब्दीं व्याप्य समाज-संस्कारस्य साडम्बर-समारोहो दृश्यते। दश-वर्षाणि व्याप्य भारतस्य नाना-स्थलानि परिभ्रमता दृष्टम्, समाज-संस्कार-संस्थाभिः देशः परिपूर्णः। किन्तु येषां रुधिर-शोषणेन भद्राख्याः प्रथित-यशस्का भद्राः संवृत्ताः तिष्ठन्ति च, तेषां कृते एकाम् अपि समितिं न दृष्टवान्। भारतवर्षस्य पुनरुद्धरणाय अस्माभिः अवश्यम् एव कर्म करणीयम्। यावत् न भारतस्य सर्व-साधारणा उत्तम-रूपेण शिक्षिता भवन्ति, उत्तम-रूपेण लालिता न भवन्ति, तावद् यावद् एव राजनीतिक-सङ्ग्रामो भवतु नाम, केनापि किमपि न स्यात्।

स्मर्तव्यम्, दरिद्राणां कुटिरेषु एव अस्माकं जातीय-जीवनं स्पन्दितं भवति। किन्तु हन्त, कोऽपि अमीषां कृते किमपि न कृतवान्। ...विधवानां पति-संख्याधीना नास्ति जातीय-भविष्यत्; सा जन-



साधारणस्य अवस्थाम् अपेक्षते। तेषाम् उन्नतिं कर्तुं शक्नोषि? तेषाम् आध्यात्मिक-प्रकृतिम् अक्षतां विदधता (त्वया) ते यथा स्वावलम्बिनो भवितुम् अर्हन्ति तथा शिक्षा दातुं शक्यते किम्?... एतद् एव करणीयं तथा वयम् एव तत् करिष्यामः।

जातिः नाम व्यक्ति-समष्टि-मात्रम्। एकैक-जनस्य शिक्षा-प्रदान-द्वारा निर्माणं विना नान्या कापि उच्चाकाङ्क्षा वर्तते मम।

अस्माभिः स्व-विषये सावधानैः भाव्यम्; एतावद् वयं नूनं कर्तुं शक्नुमः। ...अस्माकं जीवनं यदि महत् तथा पवित्रं भवेत् तदैव एतत् जगत् महत् तथा पवित्रं भवितुम् अर्हति। जगत् कार्य-स्वरूपम्, वयं कारण-स्वरूपाः। अत एत, अस्माभिः आत्मानो निष्कलुषाः पूर्णाश्च विधातव्याः।

महिलानाम् अभ्युदय आदौ विधातव्यः, जन-साधारण उद्बोधनीयः; तदैव देशस्य कल्याणम्—भारतस्य कल्याणं भवेत्।

संस्कारक-जनान् प्रत्यहं वक्तुम् इच्छामि, अहं तेषाम् अपेक्षया ज्यायान् संस्कारकः। ते किञ्चित् संस्कारं कर्तुम् इच्छन्ति—अहम् इच्छामि आमूल-संस्कारम्। अस्माकं प्रभेदः केवलं संस्कार-पद्धतौ। तेषां पद्धतिः—भञ्जनं चूर्णीकरणम्, अस्माकं पद्धतिः—परिनिर्माणम्। अहं क्षणिक-संस्कारे न विश्वासं दधामि, अहं स्वाभाविक-समुन्नतौ प्रत्ययवान्। अहम् आत्मानम् ईश्वर-पदे संस्थाप्य समाजं प्रति 'त्वया इतश्चलनीयम्, ततो न' इति वदन् आदेशं कर्तुं न साहसं करोमि। अहं केवलं तत्-काष्ठ-मार्जार इव भवितुम् इच्छामि, यो रामचन्द्रस्य सेतु-बन्ध-समये यथा-साध्यम् एकाञ्जलि-परिमिताः सिकता उद्वहन् एव आत्मानं कृतार्थं मेने। ...एतदद्भुत-जातीय-यन्त्रं शत-शत-शताब्दीः

यावत् सचलम् अस्ति, एषा अद्भुत-जातीय-नदी अस्मदग्रतः प्रवाहिता भवति—को जानाति, कः ससाहं वक्तुम् अर्हति, तद् उत्तमं वा मन्दं वा कथं तद्-गतिः नियमिता स्यात्? ...जातीय-जीवनस्य पुष्टि-कृते यद् आवश्यकं तत् तस्मै देयम्, किन्तु तत् स्वकीय-प्रकृत्यनुसारं विकशितं भवेत्; कस्यापि नैतत् साध्यम् अस्ति 'एवं विकशितो भव' इत्युपदेश-दाने। अस्माकं समाजस्य बहु-दोषाः सन्ति; अन्यान्य-समाजस्य अपि सन्ति। ...दोषारोपस्य निन्दा-वादस्य किं प्रयोजनम्? सर्व एव दोषान् दर्शयितुं शक्नुवन्ति; किन्तु य एतत्-सङ्कटत उत्तरण-मार्गं दर्शयितुं शक्नोति, स एव मानव-जातेः यथार्थ-मित्रम्। ...भारते किं कदापि संस्कारकस्य अभावः सञ्जातः? युष्माभिस्तु भारतेतिहासः अधीतः? रामानुजः क आसीत्? शङ्करः? नानकः? चैतन्यः? कवीरः? दादुः? एते ये महान्तो धर्माचार्या भारत-गगने अत्युज्ज्वल-नक्षत्रवद् एकैकश समुदिताः सन्तः पुनः अस्तं गताः, एते के आसन्? ...ते सर्वे एव चेष्टन्ते स्म तथा तेषां कर्म इदानीम् अपि प्रचलद् अस्ति। परं प्रभेदः अयम्...आधुनिक-संस्कारकाणाम् इव तेषां मुखतः कदापि अभिशाप-वाणी न उच्चारिता भवति स्म। तेषां मुखतः केवलम् आशीर्वाणी वर्षिता अभवत्। ...एतद्-द्विविध-वचन-मध्ये विशेष-प्रभेदो वर्तते। अस्माभिः स्व-प्रकृत्यनुसारम् उन्नति-निमित्तं चेष्टा कर्तव्या। वैदेशिक-संस्था बलाद् अस्मान् यया प्रणाल्या चालयितुं चेष्टन्ते, तदनुसारं कर्म कर्तुं चेष्टा वृथा, तद् अशक्य-सम्पादम्। अहम् अन्यान्य-जातीनां सामाजिक-प्रथानां निन्दनं न करोमि। तेषां कृते तस्य श्रेयस्त्वे अपि अस्माकं कृते न। तेषां कृते यद् अमृतम्, अस्माकं कृते तद् विषवद् भवितुम् अर्हति। प्रथमत एतच्छिक्षणम् एव विधातव्यम्। अन्यविध-विज्ञानैतिह्य-पद्धत्यनुसारं निर्मितत्वात् तेषाम्



आधुनिक-समाज-विधि-प्रथा एक-विधा संवृत्ता। अस्मत्-पृष्ठ-भागे अस्ति अन्यविधम् ऐतिह्यं तथा सहस्र-सहस्र-वर्षीया कृतिः, अत एव वयं स्वभावत एव अस्मत्-संस्कारानुसारं चलितुं शक्नुमः, तथा अस्माभिः तथैव करणीयम्।

अहं समग्रं जीवनं यावत् कर्म करोमि, अन्ततः कार्यं कर्तुं चेष्टां करोमि—अहं युष्मान् वच्मि, यावत् न यूयं प्रकृत्या धार्मिका भवथ तावत् न भारतस्य उद्धारो भवेत्। धर्म एव खलु भारतस्य प्राणाः, धर्मे लुप्ते सति भारतम् अपि मरिष्यति खलु। एतदर्थं भारतस्य यस्य कस्यापि संस्कारस्य अथवा उन्नतेः चेष्टा क्रियतां नाम, प्रथमतो धर्मस्य उन्नतिः आवश्यकी। भारतस्य सामाजिक-भावेन राजनीतिक-भावेन वा प्लावनात् प्राग् आदौ आध्यात्मिक-भावेन प्लावनं कुरु।

त्याग-सेवे एव भारतस्य जातीयादर्शौ—तद्-द्वय-विषये तस्य उन्नतिः विधातव्या, तदैव अवशिष्टं यत् किमपि स्वत एव उन्नतं भविष्यति।

भारतवर्षस्य सर्वे एव संस्कारका एव एतद्-गुरुतर-भ्रमेण भ्रामिताः, पौरोहित्यस्य सर्व-विधात्याचारस्य तथा अवनतेः कृते तैः धर्म एव अभियुक्तः; अतः ते हिन्दु-धर्म-रूपम् एतद् अविनश्वर-दुर्गं भङ्क्तुम् उद्यताः। एतस्य फलं किं जातम्?—नैष्फल्यम्! बुद्धाद् आरभ्य राममोहनं यावत् सर्वे एव इमं भ्रमं कृतवन्तो यत्, जाति-भेद एको धर्म-विधानम्; अतः ते धर्मं तथा जातिम् उभयम् एव युगपद् विनाशयितुं चेष्टां कृत्वा विफलाः संवृत्ताः।

शृणु मित्र, प्रभु-कृपया अहम् एतद् रहस्यम् आविष्कृतवान् अस्मि। हिन्दु-धर्मस्य न कोऽपि दोषः। अहं दार्ढ्येन वच्मि, हिन्दु-

समाजस्य उन्नति-कृते धर्म-नाशेन नास्ति प्रयोजनं तथा धर्म-कृते एव समाजस्य एतादृशी दशा इति न, परं धर्मस्य सामाजिक-विषये यथा प्रयोगः कर्तव्यः, तथा न कृत इत्यत एव समाजस्य एतादृशी दशा। अहम् अस्माकं प्राचीन-शास्त्र-सकलाद् अस्य प्रत्येकं वचनं सप्रमाणम् उपस्थापयितुं सन्नद्धः अस्मि। समाजस्य एतादृशी अवस्था दूरीकर्तव्या धर्म-विनाशेन न, परं हिन्दु-धर्मस्य महत उपदेशान् अनुसृत्य।

साधु भवतु, असाधु वा—सहस्रशो वर्षाणि यावद् भारते धर्म एव जीवनस्य चरमादर्श-रूपेण परिगण्यमानः अस्ति; साधु भवतु असाधु वा—शत-शत-शताब्दीं व्याप्य भारतस्य परिमण्डलं महादर्शेन परिपूर्णम् अस्ति; साधु भवतु असाधु वा—धर्मस्य एतत्-सकलादर्श-मध्ये एव वयं परिवर्धिताः संवृत्ताः; सम्प्रति स धर्म-भावः अस्माकं शोणितेन सह मिश्रितः संवृत्तः—अस्माकं शिरासु प्रत्येकं रक्त-बिन्दुना सह प्रवाहितः अस्ति, अस्माकं प्रकृति-गतः अस्ति, अस्माकं जीवन-शक्तिः संवृत्तः अस्ति। सहस्र-वर्षाणि यावद् या महानदी स्व-खातं रचितवती, तस्या विलोपम् अकृत्वा महाशक्तेः प्रयोगम् अकृत्वा यूयं किं तद्-धर्मं परित्यक्तुं शक्नुथ? यूयं किं गङ्गां तस्या उत्पत्ति-स्थलं हिमालयं प्रति प्रतिघातेन प्रत्यावर्तयन्तः पुनः नव-खातेन प्रवाहयितुम् इच्छथ? एतदपि यदि सम्भवेत् तथापि एतद्-देशस्य कृते तस्य विशेषत्व-सूचकं धर्म-जीवनं परित्यज्य राजनीतिः अपरं किमपि वा मूल-भित्ति-रूपेण ग्रहीतुं न शक्यते। स्वल्पतम-विघ्न-सङ्कुल-मार्गे एव यूयं कर्म कर्तुं शक्नुथ; धर्म एव भारत-पक्षे स स्वल्पतमो विघ्न-मार्गः। एतद्-धर्म-पथस्य अनुसरणम् एव भारतस्य जीवनम्, भारतस्य उन्नतेः तथा भारतस्य कल्याणस्य केवल उपायः।

अहम् अवश्यम् एतत् न वच्मि यत्, अन्यत् किमपि न



अपेक्षितम्। अहम् एतत् न वच्मि यत्, राजनीतिकस्य सामाजिकस्य वा अभ्युदयस्य नास्ति अपेक्षा इति; मम एतद् एव केवलं वक्तव्यम्—तथा मम ईप्सितम्, युष्माभिः एतत् न विस्मरणीयं यत् तत्-सकलं गौण-मात्रं धर्म एव मुख्यः। भारतवासी प्रथमतो वाञ्छति धर्मम्, ततः अन्यद् वस्तु। धर्म एव अस्माकं शोणित-स्वरूपः। यदि तद्-रक्त-प्रवाहस्य गतायातं निर्बाधं भवेत्, यदि शोणितं विशुद्धं तथा तेजोयुक्तं भवेत्, तर्हि सर्व-विषयेषु एव कल्याणं भविष्यति। यदि अयं शोणितः शुद्धो भवति, तर्हि राजनीतिकः सामाजिको वा अन्यः कोऽपि बाह्यो दोषः, किं बहुना अस्माकं देशस्य घोर-दारिद्र्य-दोषः—सर्वम् एव संशोधितं भविष्यति। एवं भारते समाज-संस्कार-प्रचार ईप्सितः चेद् दर्शनीयम्, तेन नूतन-सामाजिक-विधिना आध्यात्मिक-जीवन-लाभे को विशिष्टः सहायो भविष्यति इति। राजनीतेः प्रचारः करणीयः चेद् अपि दर्शनीयम्, अस्माकं जातीय-जीवनस्य प्रधानाकाङ्क्षा—आध्यात्मिकी उन्नतिः तद्-द्वारा कियदधिकतया साधिता भवेद् इति।

वस्तु-स्थितिं दृष्ट्वा प्रतीयते यत्, समाज-तन्त्रम् अथवा अन्यत् किमपि गणतन्त्रम्, यदभिधम् एव तद् भवतु नाम, शीघ्रं प्रचलेत्। लोकास्तु तेषां सांसारिक-प्रयोजनीय-विषयाणाम् आकाङ्क्षां पूरयितुं चेष्टिष्यन्ते। ते काङ्क्षेरन्—यथा तेषां कर्म पूर्वापेक्षया ह्रासम् आप्नुयात्, यथा ते उत्तमं भोजनं प्राप्नुयुः तथा पीडनं युद्धादिकं पूर्णतः स्थगितं भवेत्। किन्तु यदि एतद्-देशीय-सभ्यता अन्या कापि सभ्यता वा मनुष्य-धर्मोपरि, मानवस्य साधुताया उपरि प्रतिष्ठितो न भवेत्, तर्हि सा चिराय स्थास्यति इत्यत्र को निश्चयः?

केवलम् अध्यात्म-ज्ञानम् एव अस्माकं समुदय-दुःखस्य चिराय

निवारणं विधातुम् अलम्; ज्ञानान्तरम् अत्यल्प-काल-कृते अभाव-पूरक-मात्रं भवति।

अत एव अस्माकम् उद्देश्यम्—आचण्डालं यथा धर्मार्थ-काम-मोक्षाधिकार-सहायकं स्यात् तदर्थं साधनम्। अस्माकं कार्यस्य एतत् मूलं लक्ष्यं सर्वदा मनसि निधातव्यम्—'धर्मे स्तोकशः अपि आघातम् अकृत्वा जन-साधारणस्य उन्नति-विधानम्।'

अस्माभिः अयमपि एको विशिष्टो विषयः स्मर्तव्यः—परानुकरणं सभ्यताया उन्नतेः वा लक्षणं न।...अनुकरणम्—हीन-कापुरुषवद् अनुकरणं कदापि उन्नति-कारणं न भवति, परं तत् मनुष्यस्य अत्यन्तम् अवनमनस्य लक्ष्म।...एतत् तु सत्यम् अपरस्माद् अपि अस्माभिः बहु किमपि शिक्षणीयम् अस्ति; यः शिक्षितुं न इच्छति स तु प्राग् एव मृतः।...परकीयं यद् एव साधु लभसे शिक्षस्व, किन्तु तद् आदाय स्वोपयोगितया निर्मातव्यम्—पर-सकाशात् शिक्षां स्वीकर्तुं प्रवृत्तेन सता सम्पूर्णतः तदनुकरणं कृत्वा स्व-स्वातन्त्र्यं न हारय। एतद्-भारतस्य जातीय-जीवनात् सम्पूर्णतया विच्छिन्नो मा भूः; मुहूर्त-मात्रस्य कृते अपि न मन्यस्व यदि भारतवर्षस्य सर्वे अधिवासिनः अपर-जाति-विशेषस्य वेशाचारादेः अनुकरणम् अकरिष्यन्, तदैव साधु अभविष्यद् इति।

अत एव यावच्छक्यम् अतीतं प्रति दृक्पातं कुरु, पश्चाद् या अनन्त-निर्झरिणी प्रवाहिता अस्ति आप्राणम् आकण्ठं तदीयं पयः पिब, ततः सम्मुख-प्रसारितया दृष्ट्या अग्रसरो भव, तथा भारतवर्षं पुरा यावद् उन्नत-गौरव-शिखरे समारूढम् आसीत् तत् तस्माद् अपि उन्नततरम्, उज्ज्वलतरम्, महत्तरम्, अधिकतरं महिम-मण्डितं च कर्तुं चेष्टस्व।



विगत-शताब्द्यां यत्-सकल-संस्कार-कृते सङ्ग्रामः सञ्जातः, सः अधिकांशेन एव बाह्यिकः। एताः संस्कार-प्रचेष्टाः केवलं प्रथम-वर्ण-द्वयं स्पृशन्ति, वर्णान्तरं न। विधवा-विवाह-सङ्ग्रामे शत-मध्ये सप्ततेः भारतीय-नारीणां कोऽपि स्वार्थो न निहितः। अपि च, सर्व-साधारणान् अतिसन्धाय ये सर्वे भारतीया उच्च-वर्णीयाः शिक्षिताः संवृत्ताः तेषाम् एव कृते एतादृशाः सर्वे सङ्ग्रामाः। तैः स्वेषां गृहाणि प्रमार्ष्टुं तथा वैदेशिक-सविधे आत्मनः रम्यतया उपस्थापयितुं न्यौन्येन अपि चेष्टा-राहित्यं न समपादि। एष तु संस्कार इति अभिधातुं न शक्यते।

अस्माकं कार्यं भवति, अनाथ-दरिद्र-मूर्ख-कर्षकादेः कृते; पूर्वं तेषां कृते कृत्वा यदि अवसरो विद्यते तदा भद्र-जनानां कृते। अमी कर्षकादयः प्रीत्या सिक्ताः स्युः।...'उद्धरेदात्मनात्मानम्'—सर्व-विषयेषु एव एतत् सत्यम्। यथा तैः स्वेषां साहायकं विधातुं शक्यते तदर्थं वयं तेषां साहायकं विदध्मः।...ते यदा बोद्धुं शक्ष्यन्ति स्वेषाम् अवस्थाम्, उपकारस्य तथा उन्नतेः प्रयोजनम्, तदैव तव कर्म यथार्थं भवति इति ज्ञातव्यम्। कर्षकादयो मृत-प्रायाः; एतदर्थं धनिनः साहाय्येन तान् जीवयतु—एतन्मात्रम्! ततः कर्षकाः स्वेषां कल्याणं स्वयम् अवगच्छन्तु, पश्यन्तु तथा विदधतु।

स्वेषां सङ्कट-निरसने समर्थस्य, साधारण-कृते कल्याण-करस्य, प्रबलस्य जनमतस्य निर्माणम् अनेक-कालापेक्षि—एतन्मत-परिपुष्टेः प्राक् पर्यन्तम् अस्माभिः अपेक्षणीयम्। अतः समुदय-समाज-संस्कार-सङ्कट एवम् अस्ति—संस्कारो यैः अपेक्ष्यते, ते क्व? आदौ तेषां सन्नहनं विधातव्यम्। संस्कार-प्रार्थी जनः क्व? स्वल्पेषां केषाञ्चित् सविधे कोऽपि विषयो दोष-युक्ततया प्रतीयते स्म, अधिक-जनैस्तु तद् इदानीम् अपि नानुभूतम्। इदानीम् एते स्वल्पे जना बलात्कारेण

अपरेषां सर्वेषाम् उपरि स्वकीय-मतानुसारं संस्कारम् आरोपयितुं यत् चेष्टन्ते तत् पीडनम् इव; एतत्-समानं प्रबल-पीडनं पृथिव्यां नान्यद् विद्यते। स्वल्पेषां केषाञ्चित् जनानां सविधे केचन विषया दोषयुज इति प्रतीयन्ते चेद् अपि ते निखिल-जातेः हृदयं स्प्रष्टुं नालम्। निखिला जातिः कथं न नुदति? आदौ निखिला जातिः शिक्षणीया, व्यवस्था-प्रणयने सामर्थ्यभाक् कोऽपि सम्प्रदायो निर्मातव्यः; विधानं स्वत एव समायास्यति। प्रथमतो यच्छक्ति-बलेन—यदनुमोदनाद् विधानं निर्मितं स्यात् तत् सृज्यताम्। इदानीं नृपा न सन्ति; यन्नूतन-शक्त्या, यन्नूतन-सम्प्रदाय-सम्मत्या नूतन-व्यवस्था प्रणीता भवेत्, सा लोक-शक्तिः कुत्र? आदौ सा लोक-शक्तिः निर्मातव्या। अतः समाज-संस्कार-कृते प्रथमं कर्तव्यम्—लोक-शिक्षणम्। एषा शिक्षा यावत् न पूर्णतां याति तावद् अपेक्षा कर्तव्या एव।

जन-साधारणेभ्यो यदि आत्मापेक्षिता-प्रशिक्षणं दातुं न शक्यते तर्हि जगतो निखिलम् ऐश्वर्यं भारतस्य एकस्य क्षुद्र-ग्रामस्य कृते अपि अपेक्षित-साहायकाय नालं स्यात्। अस्माकं कर्तव्यं भवेत् प्रधानतः शिक्षा-दानम्—चरितस्य तथा बुद्धि-वृत्तेः उत्कर्ष-साधन-कृते शिक्षा-विस्तारः। मस्तिष्के कतिचन तथ्यानि प्रवेशितानि, समग्रं जीवनं व्याप्य परिपाको न जातः—असम्बद्धतया शिरसि भ्रमन्ति सन्ति—एषा न शिक्षा इत्युच्यते। विविध-भावा एवम् आत्मसात्कर्तव्या यथा अस्माकं जीवितं निर्मितं स्यात्; यथा मनुष्यो निर्मीयते, चरितं निर्मीयते। यदि यूयं पञ्च भावान् आत्मसात्कृत्य जीवनं चरितं च तथा निर्मातुं शक्नुथ तर्हि येन जनेन एकस्य ग्रन्थागारस्य सर्वाणि पुस्तकानि कण्ठस्थीकृतानि ततः अपि तव अधिक-शिक्षा समजनि इति वक्तव्यम्।...अत आदर्शो भवेद् यत्, अस्माभिः आध्यात्मिकी लौकिकी चेति निखिल-शिक्षायाः



प्रसारण-भारः स्वयं वोढव्यः तथा यावच्छक्यं जातीयैतिह्यानुसारं सा शिक्षा देया।

उच्यते स्म यत्, गण-शिक्षायाः प्रसारे सति जगतो महती क्षतिः स्यात्। विशेषतो भारतवर्षे प्राचीनानाम् एव सर्वत्र आधिपत्यम्। ते जन-गणतः सर्वम् एव गूहितुम् इच्छन्ति। वयम् एव जगतः शिरोमणयः—एतदात्म-प्रसादकरं सिद्धान्तं गृहीत्वा तिष्ठन्ति ते। ते किम् एतद् वचनं समाजस्य हितार्थाय वदन्ति अथवा स्वार्थान्धा वदन्ति?...अङ्गुलि-गण्यानां धनिनां विलास-कृते लक्षशो नर-नार्यः अज्ञतान्धकारे तथा अभाव-नरके निमज्जिताः सन्तु, तेषु शिक्षितेषु अथवा तेषु कृत-विद्येषु सत्सु समाज उच्छृङ्खलो भवेत्! कः समाजः? लक्षशः ते? अथवा, एते त्वम् अहं चेति दश उच्च-जातीयाः! यज्जाति-मध्ये जन-साधारणेषु विद्या-बुद्धेः यावान् प्रसारः सा जातिः तावती उन्नता।...यदि पुनः अस्माभिः समुत्थातव्यं तर्हि, तन्मार्गम् आक्रम्य अस्यार्थः साधारण-जनानां मध्ये विद्यायाः प्रसारेण। जन-साधारणानां प्रशिक्षणं तथा तेषां समुन्नति-विधानम् एव जातीय-जीवन-निर्माणस्य मार्गः। अस्माकं समाज-संस्कारका अन्विष्य न प्राप्नुवन्ति—क्षतं क्वेति।

केवलं शिक्षा, शिक्षा, शिक्षा! पाश्चात्त्य-देशस्य बहु-नगराणि पर्यट्य तेषां दरिद्राणाम् अपि सुखं स्वातन्त्र्यं विद्यां च अवेक्ष्य अस्माकं दीनान् संस्मरन् अश्रु विसृजन् आसम्। कथम् एवं प्रभेदो जातः? शिक्षेति उत्तरं प्राप्नवम्।

अस्माकं निम्न-श्रेणीयानां कृते कर्तव्यम् एतत्, केवलं तेभ्यः शिक्षा-प्रदानं तथा तेषां विनष्ट-प्रायस्य पुरुषत्व-बोधस्य समुद्बोधनम्। ...तेभ्य उत्तमोत्तम-भाव-निर्देशो विधातव्यः। तेषां चक्षुषाम् उन्मेलनं

विधातव्यं यथा ते ज्ञातुं शक्नुयुः जगति क्व किं घटत इति। भारतवर्षे एतत्-कार्य-सम्पादनं विशेषेण अपेक्षितम्।

भारतस्य जन-गण-सविधे उपगमनम् एव मम परिकल्पितम्। अस्माकं पूर्व-पुम्भिः या पद्धतिः प्रादर्शि, तस्या एव अनुसरणं विधातव्यम् अस्यार्थः महतां महताम् आदर्शानां शनैः शनैः साधारणेषु सञ्चरणं विधातव्यम्। शनैः शनैः तेषाम् उद्धरणं विधातव्यम्, शनैः शनैः तेषु साम्यं विधातव्यम्। लौकिकी विद्यापि धर्म-द्वारा शिक्षापणीया।

मन्यताम्, भवान् समग्र-भारतवर्षे विद्यालय-स्थापनं कर्तुम् आरब्धवान्, तथापि भवान् तान् शिक्षितान् कर्तुं न शक्ष्यति। कथं शक्ष्यति? चतुर्वर्षीयः कश्चन बालको हलधरः स्याद् अथवा कार्यान्तरं कुर्यात् तथापि स भवदीय-विद्यालयं पाठार्थं न गमिष्यति। ...किन्तु यदि पर्वतो मोहम्मद-समीपं न गच्छति, मोहम्मदेनैव पर्वत-समीपं गन्तव्यम्। अहं वच्मि, शिक्षा कथं द्वारि द्वारि न व्रजेत्? कर्षक-बालो यदि विद्यालयम् आगन्तुं न शक्नुयात् तर्हि कृषिक्षेत्रे अथवा कर्मशालायां यत्र यः अस्ति, तत्रैव स शिक्षितः कर्तव्यः। छायेव तत्-सहगमनं कर्तव्यम्।

दरिद्राणां शिक्षा अधिकतयैव श्रवण-द्वारा विधातव्या। विद्यालयादेः इदानीम् अपि अवसरो न सम्प्राप्तः। युष्माभिः किञ्चिदर्थ-सङ्ग्रहं कृत्वा एको वित्त-कोष-निर्माण-चेष्टा कर्तव्या।... कतिचन माया-दीपाः, कतिचन मान-चित्राणि, भू-गोलक-प्रतिकृतिः तथा कतिचन रासायनिक-द्रव्येत्यादीनि सङ्ग्रहणीयानि। प्रत्यहं सायं तत्र दरिद्रान् अनुन्नतान् अपि च चण्डालान् अपि संहतान् कुरु। तेभ्यः प्रथमतो धर्मोपदेशं कुरु, ततो तन्माया-दीपैः तथा अन्यान्य-द्रव्यैः ज्योतिष-भूगोलादि-विषये चलित-भाषया शिक्षां देहि।



युष्माकम् इदानीं कृत्यम् अस्ति देशान् ग्रामान् च पर्यट्य देशीय-जनाः प्रबोधनीया यत्, आलस्येन उपवेशनात् न सिध्येत्। शिक्षा-हीनाया धर्म-हीनायाः साम्प्रतिक्या अवनतेः विषये अपि प्रबोध्य ते वक्तव्याः 'भ्रातरः, सर्वे उत्तिष्ठत, जागृत, कियद्-दिनानि पुनः निद्रां गमिष्यथ?' गच्छ, तेषाम् अवस्थाया उन्नतिः कथं भवितुम् अर्हति तद्-विषये उपदेशं देहि तथा शास्त्रस्य महान्ति सत्यानि सबलानि कृत्वा तानि बोधय । ...सर्वान् बोधय ब्राह्मणानाम् इव युष्माकम् अपि धर्मे समानः अधिकारः। आचण्डाला एतदग्नि-मन्त्रेण दीक्षणीयाः। अपि च, सुबोध-वचसा तेभ्यो वाणिज्य-कृष्यादीनां गृहस्थ-जीवनस्य अत्यावश्यक-विषयाणाम् उपदेशं देहि।

तदपेक्षया किञ्चित् प्रयुक्ति-विद्यां प्राप्नुवन्ति चेत् लोकाः किञ्चिद् उपार्जनं कर्तुं शक्ष्यन्ति; वृत्तिः वृत्तिः इति कृत्वा न पुनः चित्करिष्यन्ति। यस्या विद्याया उन्मेषणेन इतर-साधारणा जीवन-सङ्ग्रामे समर्था विधातुं न शक्यन्ते, यया मनुष्याणां चरित-बलम्, परार्थ-परता, सिंह-साहसिकता च न समानीयन्ते, सा किं प्रकृत्या शिक्षा? यया चरित-निर्माणं भवति, मनसः शक्तिः समेधते, बुद्धेः विकाशो भवति, स्वावलम्बिता जायते एतादृशी शिक्षा अपेक्षिता।

एतद्-देशे स्त्री-पुंसयोः मध्ये प्रभेदः कथं कृत इति दुर्बोध्यम्। वेदान्त-शास्त्रे तु उक्तम्, एका एव चित्सत्ता सर्व-भूते विराजते। युष्माभिः महिलानां निन्दा एव आचर्यते, किन्तु तासाम् उन्नति-कृते किं कृतं ब्रूहि भोः?

नारी-पूजया एव सर्वा जातयः अभ्युदयं प्रपेदिरे। यद्-देशे यज्जातौ नारी-पूजा नास्ति स देशः सा जातिः कदापि वृद्धिम् आप्तुं न समर्था, कदापि न शक्ष्यति च। महामायायाः साक्षात्-प्रतिमानाम् आसां

महिलानां समुन्नतिः न विधीयते चेद् युष्माकं किमपि उपायान्तरम् अस्ति वा?

अनेके सङ्कटाः सन्ति—सङ्कटा अपि अत्यन्त-गुरुतराः। किन्तु एतादृश एकोऽपि सङ्कटो नास्ति शिक्षेति मन्त्र-बलेन यत्-समाधिः न भवितुम् अर्हति। युष्माकं नार्यः शिक्षा-दानान्तरं मोक्तव्याः। ततः ता एव वक्ष्यन्ति, किंविधः संस्कारः तासां कृते आवश्यक इति। नारीभिः एतादृश-योग्यतार्जनं कारणीयं यथा ताः स्वासां सङ्कटानां स्वयम् एव समाधानं कर्तुं शक्नुयुः। त्वं कः, यत् स्वतः प्रवृत्तः सन् नारी-जातेः सङ्कट-समाधानं कर्तुम् अग्रसरो भवसि? त्वं किं भाग्य-विधाता स्वयम् ईश्वरः? दूरम् अपसर!

धर्मं केन्द्रीकृत्य स्त्री-शिक्षा-प्रचारः कर्तव्यः। धर्मो गौणो भविष्यति। धर्म-शिक्षा चरित-निर्माणम्, ब्रह्मचर्योद्यापनम्—इत्येषां कृते शिक्षा अपेक्षिता।

भारतीय-नारीणां सीतायाः पदाङ्कानुसरणेन स्वासाम् उन्नति-विधानार्थं चेष्टा कर्तव्या। एष एव भारतीय-रमणीनाम् उन्नतेः एको मार्गः। अस्माकं नारीणाम् आधुनिक-भावेन निर्माणार्थं यत्-सकल-प्रचेष्टा विधीयन्ते, तत्-सकल-मध्ये यदि सीता-चरितादर्शतः प्रभ्रंशन-प्रचेष्टा विद्यते तर्हि तत्-सकलं विफलं भवेत्। अपि च प्रत्यहम् एव वयम् एतस्य दृष्टान्तं पश्यामः।

हिन्दु-रमणी सतीत्वं किं वस्तु तद् विना आयासं बोद्धुं शक्ष्यति; एतत् ताभिः उत्तराधिकार-सम्पर्कतः सम्प्राप्तम् इत्यतः। प्रथमतः तासु तद्-भावस्य उत्तमतया उद्दीपनं विधाय तासां चरित-निर्माणं कर्तव्यम्—यतः तासां विवाहो भवतु अथवा ताः कौमार्यम् आश्रित्य



तिष्ठन्तु, सकलावस्थासु एव सतीत्व-कृते प्राणान् दातुं कातरा न स्युः। कस्यापि एकस्य भावस्य कृते प्राण-दान-सामर्थ्यं किं न्यून-शौर्यम्?... सह च विज्ञानाद्यन्य-विषयेषु शिक्षा, यथा तासां स्वासां तथा अपरेषां कल्याणं भवितुम् अर्हति, तदपि शिक्षापणीयम्।

देशस्य स्त्री-जनानां जीवनम् एवं निर्मितं भवति चेद् एव युष्माकं देशे सीतायाः सावित्र्या गार्ग्याः पुनरभ्युत्थानं भविष्यति।

महिलाः शिक्षिता भविष्यन्ति चेद् एव काले तासां सन्ततिभिः देशस्य मुखम् उज्ज्वलं भविष्यति—विद्या, ज्ञानम्, शक्तिः, भक्तिः देशे जागृयुः।

'किमपि न नाशय', ध्वंस-वादिनः संस्कारका जगतः कमपि उपकारं कर्तुं न शक्नुवन्ति। किमपि पूर्णतो न विनाशय, पूर्णतो धूलिसात् मा कुरु, वरं निर्माणं कुरु। यदि शक्नोषि साहाय्यं कुरु; यदि न शक्नोषि, हस्तं सङ्कोच्य तूष्णीं दण्डायमानो भव, तथा यथा चलति तथा चलनम् अनुमन्यस्व। यदि साहाय्यं कर्तुं न शक्नोषि, अनिष्टं मा कुरु।...यो यत्र तिष्ठति तं तत उपरि उन्नेतुं चेष्टस्व।... त्वम् अहं च किं कर्तुं शक्नुवः? त्वं किं मनुषे, त्वम् एकं शिशुं किमपि शिक्षापयितुं शक्नोषि?—न शक्नोषि। शिशुः स्वयम् एव शिक्षा-लाभं करोति। तव कर्तव्यम्, सुयोग-विधानम्—प्रत्यूहापसारणम्।

मम जीवने इयम् एकैव आकाङ्क्षा यत्, अहम् एतादृशम् एकं यन्त्रं चालयित्वा यास्यामि—यत् प्रत्येक-जन-समीपम् उन्नतोन्नत-भाव-राशिम् उद्वहिष्यति। ततः पुरुषो वा भवतु नारी वा भवतु—स्वयम् एव स्वेषां भाग्य-रचनां विधास्यन्ति।

चिन्तायाः तथा कार्यस्य स्वातन्त्र्यम् अपेक्षते जीवनम्, उन्नतिः

तथा कल्याणम्। एतदभावात् मनुष्यस्य वर्णस्य तथा जातेः पतनम् अवश्यम्भावि। यथा मनुष्यस्य चिन्तायाः तथा भाषणस्य स्वातन्त्र्यम् अपेक्षितं तथैव तस्य आहारे वसने विवाहे तथा अन्येषु सर्वेषु एव विषयेषु स्वातन्त्र्यम् अपेक्षितम्—परम् एतत् स्वातन्त्र्यम् अन्यस्य कस्यापि अनिष्टं न कुर्यात्।

अहं वच्मि, अस्माभिः इदानीं बलम् अपेक्ष्यते, वीर्यम् अपेक्ष्यते। मनुष्यं प्रति सर्वदा तस्य दौर्बल्य-विषये संस्मरणोपदेशः तत्प्रतीकारो नास्ति—तदीय-शक्तेः संस्मारणम् एव प्रतीकारोपायः। अस्माकं देशस्य कृते इदानीम् अपेक्ष्यते—लौहवद् दृढा मांस-पेशिः तथा अय इव स्नायुः; एतादृशी दृढा इच्छा-शक्तिः अपेक्ष्यते, यथा केनापि सा प्रतिरोद्धुं न शक्यते, सा ब्रह्माण्डस्य निखिल-रहस्य-भेदे समर्था भवेत्—यदि एतत्-कार्य-साधने समुद्रस्य अतलः तलः अपि गमनीयो भवति, यदि वा सर्वदा सर्वथा मृत्युः अपि आलिङ्गनीयो भवति, तदर्थम् अस्माभिः सन्नद्धैः भाव्यम्। एतद् एव अस्माकं सम्प्रति अपेक्षितम्। एतद्-वीर्य-लाभस्य प्रथम उपायः—उपनिषदि विश्वासः तथा अयं विश्वासो यद् अहम् आत्मा। तद्-द्वारा समग्रं जगत् पुनः उज्जीवितम्, शक्तिमत् तथा वीर्यशालि विधातुं शक्यते। शत-शत-शताब्दी-कालं यावत् मनुष्येभ्यः तदीय-हीनत्व-ज्ञापक-मतवाद-विषये शिक्षा दीयते;... ते इदानीम् आत्म-तत्त्व-श्रवणं कुर्वन्तु—ते जानन्तु यत्, तेषां मध्ये हीनतम-जनस्य अपि हृदये आत्मा अस्ति; तस्य आत्मनो जन्म नास्ति, मृत्युः नास्ति। स आत्मा जन्म-हीनो मृत्यु-रहितः च।

यत्रैव अशुभम्, यत्रैव अज्ञानं दृश्यते—अहं मम स्वानुभवतः ...वान् तथा अस्माकं शास्त्रम् अपि तद् वचनं वक्ति यत्, भेद-



बुद्धित एव निखिलम् अशुभम् आयाति तथा अभेद-बुद्धौ सत्यां निखिल-विभिन्नता-मध्ये वास्तविकी एका सत्ता विद्यते—एतस्मिन् विश्वासः क्रियते चेत् सर्व-विधं कल्याणं जायते। अयम् एव वेदान्तस्य महोन्नत आदर्शः। वेदान्तस्य एतत् सकलं महत् तत्त्वं केवलम् अरण्ये गिरि-गुहायां वा आबद्धं न स्थास्यति; विचारालये, भजनालये, दरिद्र-कुटिरे, मत्स्य-जीवि-गृहे, छात्रस्य अध्ययनागारे—सर्वत्र एतत् सकलं तत्त्वम् आलोचितं भविष्यति, कर्मणा च उपपादितं भविष्यति। प्रत्येकं स्त्री-पुंसाः, प्रत्येकं बालक-बालिकाः—यो यत् कर्म करोतु नाम, यो यादृगवस्थो भवतु नाम—सर्वत्र वेदान्तस्य प्रभाव-विस्तार आवश्यकः। तत्-सत्य-जातम् अवलम्बस्व, तदुपलब्धिं कृत्वा कर्मणा उपपादय—तर्हि निश्चयेन भारतस्य समुद्धरणं भविष्यति।

प्रकृतेः वैषम्ये सत्यपि सर्वेषां समानं सौकर्यं भवेत्। किन्तु यदि कस्मैचिद् अधिकम्, कस्मैचिद् वा न्यूनम् आनुकूल्यं क्रियेत एव तर्हि बलवदपेक्षया दुर्बलाय अधिकम् आनुकूल्यं विधातव्यम्।

अस्यार्थः चण्डालस्य विद्या-शिक्षा यावती अपेक्षिता, ब्राह्मणस्य तावती नास्ति। यदि ब्राह्मण-पुत्रस्य एकेन शिक्षकेण प्रयोजनम्, चण्डाल-पुत्रस्य दशभिः प्रयोजनम्। यतो यस्मै प्रकृत्या स्वाभाविकं प्राखर्यं न दत्तम्, तस्मै अधिकतया साहाय्यं विधातव्यम्।

एतेषाम् उन्नमनं कर्तव्यम्, अभय-वाणी श्रावणीया। वक्तव्यम्—'यूयम् अपि अस्मादृशा मनुष्याः, युष्माकम् अपि अस्माकम् इव सर्वे अधिकाराः सन्ति।'

उच्चतर-वर्णान् अधः अवतार्य एतत्-सङ्कट-समाधानं न भविष्यति, निम्न-जातीया उन्नेतव्याः।...एकतो ब्राह्मणः, अपरतः

चण्डाल:; चण्डालस्य क्रमशो ब्राह्मणत्वे उन्नमनम् एव ...कार्य-प्रणाली। जाति-भेदस्य वैषम्यम् अपाकृत्य समाजे साम्यानयनस्य एक-मात्र उपाय उच्च-वर्णस्य शक्ते: कारण-स्वरूपाया: शिक्षाया: कृष्टे: च आयत्तीकरणम्।

धनि-दरिद्रयो: मध्ये विवादो न साधनीय:। विशिष्टानुकूल्य-भोगस्य चिन्तनं मनुष्य-जीवनस्य कलङ्क-स्वरूपम्। ...अपि च, यावद् एव वैयक्तिकम् आनुकूल्यं विभग्नं भवति, तावद् एव तत्-समाजे ज्ञानस्य दीप्ति: तथा प्रगति: आगच्छति। ...वैयक्तिकम् आनुकूल्यं कथमपि न।

एके जना: स्वभाव-सिद्ध-प्रवणता-वशाद् अन्यापेक्षया अधिक-धन-सञ्चयं कर्तुं शक्ष्यन्ति—एतत् तु स्वाभाविकम्। किन्तु धन-सञ्चयस्य एतादृश-सामर्थ्य-वशात् ते असमर्थ-जनानाम् उत्पीडनं तथा निष्ठुरतया पद-दलनं विधास्यन्ति एतत् तु नीति-सम्मतं नास्ति; एतदधिकार-विरोधेन सङ्ग्राम: प्रचलन् अस्ति। अन्यं वञ्चितं कृत्वा स्वयमधिकार-भोग एव अधिकार-वाद: तथा युग-युगान्तं व्याप्य नीति-धर्मस्य लक्ष्यम् एतदधिकार-वादस्य ध्वंसनम्। वैचित्र्यम् अविक्षतं विधाय साम्यम् ऐक्यं च प्रति उपसर्पणम् एव कार्यम्। एवं सर्वेषाम् अधिकाराणां तथा अस्मन्मध्ये अधिकार-परिपोषकाणां सर्वेषां निष्पेषणं विधाय अस्माभि: तज्ज्ञान-लाभार्थं चेष्टा विधातव्या यत् सकल-मानव-जातिं प्रति साम्य-बोधस्य आनयनं कुर्यात्।

भारतवर्षस्य पतनस्य तथा दु:ख-दारिद्र्यस्य अन्यतमं कारणम् एतद् यद् भारतं निज-कर्म-क्षेत्रं सङ्कुचितम् अकरोत्, शम्बूकवद् द्वारम् अर्गल-बद्धं कृत्वा उपविशति स्म, सत्य-जिज्ञासूनाम् आर्येतरादीनाम् अग्रत: स्वकीय-रत्न-भाण्डागारम्—जीवनप्रद-सत्य-रत्न-भाण्डागारं न उन्मुमोच।



आदान-प्रदानम् एव प्रकृते: नियम:; भारतेन यदि पुन: उन्नमनं कर्तव्यं तर्हि तेन निजैश्वर्य-भाण्डागारस्य उन्मोचनं विधाय पृथिव्या निखिल-जाति-मध्ये प्रसारणं कार्यं तथा विनिमयेन अपरै: यत् किमपि दीयते तद् अपि ग्रहणार्थं सन्नद्धेन भाव्यम्। सम्प्रसारणम् एव जीवनम्—सङ्कीर्णता एव मृत्यु:; प्रेम एव जीवनम्—द्वेष एव मृत्यु:।

अपेक्ष्यते पाश्चात्त्य-विज्ञानेन सह वेदान्त: तथा मूल-मन्त्रो ब्रह्मचर्यम्, श्रद्धा तथा आत्म-प्रत्यय:। यूयं किं साम्य-स्वातन्त्र्य-कार्योत्साह-विषये एक-निष्ठ-पाश्चात्त्या: तथा धर्म-विश्वासे साधनायां च एक-निष्ठ-हिन्दवो भवितुं शक्नुथ?

वृथा शक्ति-क्षयम्, तथा रात्रिन्दिवं कतिपय-निकृष्ट-काल्पनिक-विषयेषु वाक्य-व्ययम् अकृत्वा आङ्गलीयानां सकाशाद् आज्ञा-मात्रं नेतु: आदेश-पालनस्य, ईर्ष्या-हीनताया:, अदम्याध्यवसायस्य तथा आत्मनि अनन्त-विश्वास-स्थापनस्य शिक्षणम् अस्मत्-कृते विशेषेण कर्तव्यम्। ...सर्वेषाम् एव कर्तव्यम् आदेश-दानात् प्राग् आदेश-पालन-प्रशिक्षणम्। ...यावद् एतौ ईर्ष्या-द्वेषौ न दूरीभवत: तथा नेतु: आज्ञा-वहत्व-शिक्षा हिन्दुभि: न क्रियते तावद् एका समाज-संहति: भवितुं न अर्हति एव। ...पाश्चात्त्य-सकाशाद् भारतेन शिक्षणीयम्—बहि:प्रकृते: जय:, तथा भारत-सकाशात् पाश्चात्त्यै: शिक्षणीय: अन्त:प्रकृति-जय:। वयं मनुष्यत्वस्य एक-भागस्य, ते अपर-भागस्य विकाशं कुर्वन्ति। एतद्-द्वयस्य सङ्गमनम् एव अपेक्षितम्।

उन्नति-कृते कस्या अपि जाते: व्यक्ते: वा वस्तु-त्रयम् अपेक्षितम्—

१. साधुताया: शक्तौ प्रागढो विश्वास:।

२. हिंसाया: तथा सन्दिग्ध-भावस्य एकान्तत: अभाव:।

३. ये सन्तो भवितुम् अथवा सत्कर्म कर्तुं सचेष्टाः तेभ्यः सहायता-प्रदानम्।

प्रथमत एहि ...ईर्ष्या-तिलक-प्रमृष्टं विदधामि। कमपि प्रति ईर्ष्यान्वितो मा भूः। सर्वेषां शुभ-कर्म-व्रतिनाम् एव साहाय्य-विधानार्थं सर्वदा सन्नद्धो भव। त्रिलोकस्य प्रत्येक-जीवम् उद्दिश्य शुभेच्छा-प्रेरणं कुरु। अस्माकं शास्त्रोपदिष्टस्य निखिल-विषयस्य एव लक्ष्यम्—निज-क्षुद्र-वेष्टनीतो बहिः गत्वा सर्वैः सह मिलित्वा पारस्परिक-भावानाम् आदान-प्रदानं कृत्वा औदार्याद् औदार्यतरत्व-समर्जनम्—क्रमशः सार्वभौम-भावोपगमनम्। अन्यत् किमपि न अपेक्षितम्, केवलं प्रेम, आर्जवं तथा सहिष्णुता।

इदानीम् अपेक्ष्यते प्रबलः कर्म-योगः, हृदये असीमं साहसम्, अमित-बल-पोषणम्।

मद्वचो यदि शृणोषि, तर्हि त्वया आदौ तव गृह-द्वारम् उन्मुक्तं विधातव्यम्। तव गृहस्य समीपे पल्ल्याः समीपे कियन्तः अभाव-पीडिता जनाः सन्ति, त्वया तेषां यथासाध्यं सेवनं विधातव्यम्। यः पीडितः तस्मै औषधादि-समायोजनं करणीयं तथा शरीरेण सेवनं शुश्रूषणं विधातव्यम्। यो भोज्यं न प्राप्नोति तस्मै भोज्य-प्रदानम्। यः अज्ञानः, तस्मै—त्वया यद् एतत् प्रशिक्षणं सम्प्राप्तम्, मुखेन यावच्छक्यं बोधनीयम्।

लक्षशो नर-नारी-गणाः पवित्रताया अग्नि-मन्त्रेण दीक्षिताः सन्तो भगवति दृढ-विश्वास-रूपेण वर्मणा सज्जिताः सन्तो दरिद्र-पतित-पद-दलितान् प्रति सहानुभूति-जनित-सिंह-विक्रमेण हृदयं दृढ-बद्धं कुर्वन्तु तथा मुक्तेः, सेवायाः, सामाजिकोन्नयनस्य तथा साम्यस्य मङ्गलमयीं वार्तां द्वारि द्वारि वहन्तः समग्र-भारतं पर्यटन्तु।



यदा शतशो महाप्राण-नर-नारी-गणो विलास-भोग-सुखेच्छां विसृज्य काय-मनोवाक्यैः दारिद्र्यस्य मूर्खतायाश्च घनावर्त्त-मध्ये क्रमश उत्तरोत्तरं निमज्जतां कोटिशः स्वदेशीय-नर-नारीणां कल्याण-कामनां विधास्यन्ति, भारतं तदा पुनः जागृयात्।

# चतुर्थः अध्यायः

## सर्वदा अग्रसरो भव

यूयम् ईश्वरस्य सन्तानाः, अमृतस्य अधिकारिणः—पवित्राः पूर्णाः। त्वम् आत्मानं दुर्बलं ब्रूषे कथम्? उत्तिष्ठ साहसी भव, वीर्यवान् भव। निखिलं कृत्यं स्वयं स्वीकुरु—जानीहि त्वम् एव तव अदृष्टस्य सृष्टिकर्ता। त्वया यावती शक्तिः सहायता वा अपेक्ष्यते सा तव अन्तरे एव विद्यते।

ब्राह्मणेतर-जातिम् अहं वच्मि—'अपेक्षस्व, त्वरां मा कुरु। सुयोगे सम्प्राप्ते एव ब्राह्मण-जातिं प्रति आक्रमणं मा विधेहि। यतः ...यूयं स्व-दोषाद् एव क्लेशं प्राप्नुथ। संवाद-पत्रे एतत्-सकल-वाद-प्रतिवाद-विवाद-विसंवाद-द्वारा वृथा शक्ति-क्षयम् अकृत्वा स्व-गृहे एतादृश-विवाद-लिप्ता न भूत्वा निखिल-शक्ति-प्रयोगेण ब्राह्मणो यच्छिक्षा-बलाद् एतादृश-गौरवाधिकारी संवृत्तः, तद् अर्जितुं चेष्टां कुरुथ, तदैव तव उद्देश्य-सिद्धिः भविष्यति।

यूयम् उच्च-वर्णीयाः किं जीविताः स्थः? यूयं दश-सहस्र-वर्ष-प्राक्कालीनं शव-शरीरम्! ये चलत् श्मशानम् इत्यभिधाय युष्माकं पूर्व-पुम्भिः निन्दिताः, भारते यत् किमपि वर्तमानं जीवनम् अस्ति तत् तेषाम् एव मध्ये वर्तते। अपि च, चलत् श्मशानं यूयम्। ...आम्, युष्माकम् अस्थिमयाङ्गुलिषु पूर्व-पुरुषैः सञ्चितानि कतिचन अमूल्य-रत्नाङ्गुरीयकाणि सन्ति, युष्माकं पूति-गन्ध-शरीरालिङ्गनेन पूर्व-





कालस्य अनेक-रत्न-पेटिका रक्षिताः सन्ति।...उत्तराधिकारिभ्यो दत्त, यावच्छीघ्रं दत्त। यूयं शून्ये विलीना भवत, तथा नूतनं भारतं प्रकाशितं भवतु।

अयं जन-साधारणो यदा जागरितो भविष्यति तथा तेषाम् उपरि युष्माकम् (भद्र-जनानाम्) उत्पीडनं बोद्धुं शक्ष्यति तदा तेषां फूत्कारेण यूयं क्व उड्डीनाः पतिष्यथ! ते एव युष्माकं मध्ये सभ्यताम् समाहृतवन्तः, तैः एव पुनः सर्वं भग्नं स्यात्।...एतदर्थं वच्मि एतत्-सकल-नीच-जातीनां मध्ये विद्या-दानं ज्ञान-दानं कृत्वा एतेषां निद्रा-भङ्गार्थं यत्न-शीलो भव। एते यदा जागरिताः स्युः, अपि च कदाचिद् अवश्यं जागरिताः स्युः—तदा ते अपि युष्मत्-कृतम् उपकारं न विस्मरिष्यन्ति, युष्माकं सविधे कृतज्ञाः स्थास्यन्ति।

प्रत्येकम् अभिजातेः कर्तव्यं निज-समाधेः उत्खननम्। अपि च, यावत् शीघ्रं ते एतत् कार्यं कुर्वन्ति तावद् एव तेषां कृते मङ्गलम्। यावद् विलम्बं करिष्यन्ति तावद् एव ते पचनं प्राप्स्यन्ति तथा ध्वंसः अपि तावान् भयानको भविष्यति। एतदर्थं ब्राह्मण-जातेः कर्तव्यम्—भारतस्य अपरापर-जातीनां समुद्धरणार्थं प्रयतनम्।

यावद् भारतस्य कोटिशो लोका दारिद्र्याज्ञानान्धकारे निमज्जिताः सन्ति तावत् तेषां धनेन शिक्षिताः किन्तु ये तान् प्रति दृक्पातम् अपि न कुर्वन्ति—एतादृशान् प्रत्येकं जनान् अहं देश-द्रोहिणः चिन्तयामि। यावद् भारतस्य विंशति-कोटि-जनाः क्षुधार्त-पशुवत् स्थास्यन्ति, तावद् ये सर्वे महाजनाः तान् सर्वान् पिष्टान् कृत्वा, मुद्रार्जनं कृत्वा साडम्बरं भ्रमन्ति तथा तेषां कृते किमपि न कुर्वन्ति, अहं तान् हत-भाग्य-पामरा इति वच्मि।

'आत्मवत् सर्व-भूतेषु' किं केवलं ग्रन्थ-मध्ये एव स्थास्यति? ये एकं रोटिका-खण्डं दरिद्र-मुखे दातुं न शक्नुवन्ति, ते पुनः मुक्तिं कथं दास्यन्ति? ये अपरस्य निःश्वासेन अपवित्रा भवन्ति, ते पुनः अपरं पवित्रं विधास्यन्ति? अस्पृश्यता-विचार एक-विधो मानसिको रोगः।

युष्माकं मनुष्यत्वं सप्रमाणं कुरुत, परं प्रभु-भावेन न, कुसंस्काराच्छन्नेन गलितेन अहङ्कारेण न , प्राच्य-पाश्चात्त्ययोः उद्भट-सम्मिश्रण-द्वारा अपि न, केवलं सेवा-भावेन।

धनस्य विद्याया ज्ञानार्जनस्य वा—सकल-सामाजिक-जनस्य समानः सुयोगो यथा भवेत् तदपि निर्वर्त्तनीयम्। सर्व-विषये स्वातन्त्र्यम् अस्यार्थः मुक्तिं प्रति अग्रसरता एव पुरुषार्थः।...ये सर्वे सामाजिक-नियमा एतत्-स्वातन्त्र्यस्य स्फूर्तेः व्याघातं कुर्वन्ति ते अकल्याण-कराः तथा यथा तेषां शीघ्र-नाशो भवेत् तथैव विधातव्यम्। यत्-सकल-नियम-द्वारा जीव-कुलं स्वतन्त्रता-मार्गे अग्रसरं भवति, तस्य साहायकं विधातव्यम्।

निखिल-वस्तुनः अग्र-भागो दरिद्राणां प्राप्यः—अवशिष्टांशे अस्माकम् अधिकारः। प्रथम-पूजा विराजः पूजा; युष्माकम् अग्रतः—युष्मान् परितो ये विद्यन्ते तेषां पूजा; एतेषां पूजा विधातव्या—सेवा न; सेवा इत्युक्ते मम अभिप्रेतो भावो यथार्थतया हृदयङ्गमो न स्यात्, पूजा-शब्देन एव स भावो यथार्थतया प्रकाशयितुं शक्यते। एते सर्वे मनुष्याः तथा पशवः—एते एव तव ईश्वरः, अपि च तव देश-वासिन एव तव प्रथमोपास्याः। तव स्व-जातिः—एषा देवता एव केवलं जागरिता अस्ति; सर्वत्रैव तस्या हस्तः, सर्वत्र तस्याः कर्णौ, सा निखिलं स्थानं व्याप्य विद्यते। अन्या देवता निद्रिता अस्ति। कस्य



निष्क्रिय-देवस्य अन्वेषणार्थं त्वं धावन् असि, अपि च तव अग्रतः, त्वां पुरतो यां देवतां पश्यसि, तस्य विराज उपासनं कर्तुं न शक्नोषि?

प्रत्येकं नरं नारीम्— सर्वान् एव ईश्वर-दृष्ट्या पश्यन् वर्तस्व।

अहम् एतावत् तपः कृत्वा एतत् सारम् अवगतवान् अस्मि यत्, प्रति-जीवं सः अधिष्ठितः, तं विना ईश्वरादिकं किमपि नान्यद् विद्यते।—यो जीवे प्रेमी अस्ति स एव ईश्वरं सेवते।

यदि त्वम् ईश्वरस्य व्यक्तं रूपं तव भ्रातरम् उपासितुं न शक्नोषि तदा अन्यत्र क्वापि त्वया क्रियमाणा अन्या कापि उपासना विश्वास-पदवीं न गाहते। यदि ईश्वरोपासना-कृते मन्दिर-निर्माणं कर्तुम् इच्छसि तत्तु उत्तमम्, किन्तु पूर्वत एव तदपेक्षया उन्नततरं महत्तरं मानव-देह-रूपं मन्दिरं तु वर्तते एव।

काय-मनो-वाक्यैः जगद्धिताय दातव्यम्। पठितवान् असि, 'मातृदेवो भव, पितृदेवो भव', अहं वच्मि, दरिद्र-देवो भव, मूर्ख-देवो भव। दरिद्र-मूर्खाज्ञानि-कातराः—एते तव देवता भवन्तु, एतेषां सेवनम् एव परमं धर्मं विद्धि।

अहं निश्चयेन जानामि, भारत-माता तस्याः श्रेष्ठ-सन्तानानां जीवनं बलि-रूपेण वाञ्छन्ति। ये जगति सर्वापेक्षया साहसिनो वरेण्याश्च, तैः चिराय बहु-जन-हिताय बहु-जन-सुखाय आत्म-विसर्जनं कर्तव्यम्। अनन्तं प्रेम तथा कारुण्यं हृदि कृत्वा शत-शत-बुद्धानाम् आविर्भावः अपेक्षितः।

मनुष्यः अपेक्ष्यते, मनुष्यः अपेक्ष्यते; अन्यत् सर्वं स्वतो भविष्यति। वीर्यवान्, पूर्णतः अकपटः, तेजस्वी, विश्वासी युवक आवश्यकः। एवम् एक-शत-युवका भवन्ति चेत् समग्र-जगतो भाव-स्रोतः

परावर्तयितुं शक्यते। तेषां जीवनम् आदौ निर्मातव्यम्। तर्हि सिद्धिः स्यात्। ये सर्वे युवानो भारतस्य निम्न-जातीयानाम् उन्नयन-रूपे केवले कर्तव्ये मनः-प्राण-नियोगं कर्तुं शक्नुवन्ति, तेषां मध्ये कर्म कुरु, ते जागरणीयाः—संहति-बद्धा विधातव्याः तथा एतत्-त्याग-मन्त्रेण दीक्षणीयाः। एतत्-कर्मणि भारतस्य युवक-गणं पूर्णतया अपेक्ष्यते।

अहम् एतान् युव-जनान् सङ्घ-बद्धान् कर्तुम् एव जन्म-ग्रहणं कृतवान् अस्मि। अपि च केवलम् एते एव न, भारतवर्षस्य नगरे नगरे भूयोऽपि शत-शत-युव-जना मया सह योग-दानार्थं सन्नद्धाः सन्ति। एते दुर्दमनीय-तरङ्गाकारेण भारत-भूमेः उपरि-देशे प्रवाहिता भविष्यन्ति, तथा ये सर्वापेक्षया दीना हीनाः तथा पद-दलिताः तेषां द्वारि द्वारि सुख-स्वाच्छन्द्य-नीति-धर्म-शिक्षा-वहनं करिष्यन्ति—एतद् एव मम आकाङ्क्षा तथा व्रतम्, एतद् अहं साधयिष्यामि अथवा मृत्यु-वरणं करिष्यामि।

हे महाप्राण, उत्तिष्ठ, जागृहि! जगद् दुःखेन दग्धं सत् शुष्कं जायते—तव कृते किं निद्रा शोभते? एहि, वयम् आह्वयन्तः स्मः, यावत् न निद्रिता देवता जागरिता भवति, यावत् न अन्तरस्य देवता बहिराह्वानस्य प्रत्युत्तरं न करोति। जीवने एतदपेक्षया अन्यत् किं महत्तरम् अस्ति?

पश्य, जीवा मोह-रूप-कुम्भीर-कवले पतित्वा कियन्तं क्लेशं प्राप्नुवन्ति! अहह! तेषां हृदय-विदारकं करुणम् आर्तनादं शृणु। हे वीराः, बद्धानां पाश-मोचनार्थं दरिद्रस्य क्लेश-भार-हारार्थं तथा अज्ञ-जनानां हृदयान्धकार-दूरीकरणार्थम् अग्रसरा भवन्तु।—अग्रसरा भवन्तु। वयं हृदय-शून्य-मस्तिष्क-सारं जन-गणं तथा तेषां तेजोहीन-संवाद-पत्र-प्रबन्ध-जातं न गणयामः।



वयं दरिद्राः, वयं नगण्याः, किन्तु अस्मत्-सदृशा दीना एव चिराय तत्-परम-पुरुष-यन्त्र-स्वरूपाः सन्तः कर्म सम्पादितवन्तः।

दरिद्रा एव पृथिव्यां चिराय महत् तथा विशालं कार्य-जातं साधितवन्तः। गण्य-मान्याः, उच्च-पदस्थाः तथा धनिनः कदापि न आस्थेयाः। तेषां मध्ये जीवन-शक्तिः नास्ति—ते प्रायेण मृत-कल्पा इति वक्तुं शक्यते। आस्था अस्ति युष्माकम् उपरि—पद-मर्यादा-हीनानाम्, दरिद्राणाम्, किन्तु विश्वासवताम्—युष्माकम् उपरि।

उपसर्प, उपसर्प। आ मृत्योः दरिद्राणाम्, पद-दलितानाम् उपरि सहानुभूतिः स्याद् एष एव अस्माकं मूलो मन्त्रः। उपसर्प, वीर-हृदय युवक-वृन्द! भगवति विश्वासं स्थापय। केनापि चातुर्येण नास्ति प्रयोजनम्; चातुर्येण किमपि न भवति। दुःखिनां पीडानुभवं कुरु, अपि च भगवत्-सकाशात् साहाय्यं प्रार्थयस्व—साहाय्यम् आयास्यति एव।...युव-जनाः, अहं युष्मभ्यम् एतेषां दरिद्राणाम् अज्ञानाम् अत्याचारितानां कृते एतादृशीं सहानुभूतिम्, एतादृशीं प्राण-पण-कर्तव्य-चेष्टाम् उत्तर-दायत्वेन अर्पयामि।...यूयम् अखिलं जीवनम् एतेषां त्रिंशत्-कोटि-भारतवासिनाम् उद्धारार्थं व्रत-ग्रहणं कुरुत, ये प्रतिदिनं निमज्जन्ति।

यूयं यदि मम सन्ताना भवत तर्हि युष्माभिः कस्माद् अपि न भेतव्यम्, केनापि युष्माकं गति-रोधः कर्तुं न शक्ष्यते। यूयं सिंह-तूल्या भविष्यथ। भारतम्—समग्रं जगत् जागरणीयम्।

ग्रामं ग्रामं व्रज, गृहं गृहं व्रज; लोक-हितम्, जगत्-कल्याणं कुरु—स्वयं नरकं याहि, परस्य मुक्तिः भवतु। अरे, मृत्युः यदा अनिवार्य एव, तदा लोष्टवत् मरणापेक्षया वीरवत् मरणं श्रेयः।...

जरा-जीर्णाः सन्तः स्तोकशः क्षयं प्राप्य मरणापेक्षया वीरवद् अपरस्य स्वल्प-कल्याण-कृते अपि सङ्ग्रामं कृत्वा मरणं किं न श्रेयः?

त्वं कर्मणि प्रवृत्तो भव; द्रक्ष्यसि एतावती शक्तिः आयास्यति यद् धारयितुं न शक्ष्यसि। परार्थम् एतन्मात्रं कर्म करोषि चेद् अन्तः शक्तिः जागरिता भवति। पर-कृते किञ्चित् चिन्तनं क्रियते चेद् हृदये सिंह-बल-सञ्चारो भवति। युष्मासु एतावत्-प्रणयं करोमि, किन्तु इच्छा भवति, यूयं पर-कृते श्रमं कुर्वन्तो म्रियध्वम्—अहम् अवलोकयन् आनन्दितः स्याम्।

यः अर्थं यशः तथा अन्यं कमपि अभिलाषं वर्जयित्वा कर्म करोति, स एव सर्वापेक्षया उत्तमतमं कर्म करोति; तथा मनुष्यो यदा एतादृशं कर्म कर्तुं समर्थो भविष्यति तदा सोऽपि एको बुद्धो भविष्यति तथा तस्य अन्तरत एतादृश्याः कर्म-शक्त्या उत्सरणं भविष्यति, या जगतो रूप-परिवृत्तिं साधयिष्यति।

प्रेम्णो जयः अवश्यम् एव स्यात्। यूयं किं मनुष्येषु प्रणयं कुरुथ? ईश्वरस्य अन्वेषणार्थं क्व यास्यथ? दरिद्र-दुःखि-दुर्बलाः—सर्वे एव किं तव ईश्वरो न? आदौ तेषाम् उपासनं किमर्थं न कुरुथ? गङ्गा-तटे वसन्तः कूप-खननं कुरुथ कथम्? प्रेम्णः सर्व-शक्तिमत्तायां विश्वासं स्थापय।

अस्माकं सौभाग्यं यत्, वयं तस्य ईप्सितं कर्म कर्तुम् अवसरं लब्धवन्तः—तस्य साहाय्यार्थं न। 'साहाय्यम्' इत्ययं शब्दो युष्माभिः मनसो मार्जनीयः। साहाय्यं त्वं कर्तुं न शक्नोषि। एतादृश-भाषणम् ईश्वर-निन्दनम्। उपासना-बोधेन तावन्मात्रं कुरु। दरिद्र-जनानां मध्ये अहम् ईश्वरं पश्येयम्, स्व-मुक्ति-कृते तेषां समीपं गत्वा तेषां पूजनं



कुर्याम्—ईश्वरः तेषु विद्यते। केचन जना यद् दुःखं प्राप्नुवन्ति, तत् तव मम मुक्ति-कृते—यथा वयं रोगि-प्रमत्त-कुष्ठि-पापि-प्रभृति-रूपधारिणः प्रभोः पूजां कर्तुं शक्नुमः।

आस्तिको भव नास्तिको वा, आत्मानं विस्मर—एष एव प्रथमतः शिक्षा-विषयः।

समाजस्य कृते यदा आत्मनो निखिल-सुखेच्छाम् उपायनीकर्तुं शक्ष्यसि तदा तु त्वम् एव बुद्धो भविष्यसि, त्वम् एव मुक्तो भविष्यसि।

एत, वयं प्रार्थयामः, 'तमसो मा ज्योतिर्गमय'; तथा सति निश्चयेन अन्धकार-मध्ये आलोक-राशेः विकाशो भविष्यति, अस्माकं परिचालनार्थं तस्य मङ्गल-हस्तः प्रसारितः स्यात्। एत, अस्माकं मध्ये प्रत्येकं जनो रात्रिन्दिवं दारिद्र्येण पौरोहित्य-शक्त्या तथा प्रबल पीडनेन निपीडितानां भारतस्य लक्षशः पद-दलितानां कृते प्रार्थनां कुर्यात्, दिवा-रात्रं तेषां कृते प्रार्थनां कुरु। महाजनानां तथा धनिनां समीपे अहं धर्म-प्रचारं कर्तुं न इच्छामि। अहं तत्त्व-जिज्ञासुः नास्मि, दार्शनिकः अपि न, न न—अहं साधुरपि न। अहं दरिद्रः—दरिद्रेषु अहं प्रणयी।...किन्तु भारतस्य चिर-पतितानां विंशति-कोटि-नर-नारीणां कृते कस्य हृदयं क्रन्दति? ...तान् एव अहं महात्मनो वच्मि, येषां हृदयतो दरिद्राणां कृते रक्त-निस्सरणं भवति। ...तेषां कृते कस्य हृदयं क्रन्दति ब्रूहि? एते एव युष्माकम् ईश्वरः, एते एव युष्माकं देवता भवन्तु, एते एव युष्माकम् इष्टा भवन्तु। तेषां कृते चिन्तय, तेषां कृते कर्म कुरु, तेषां कृते सदा प्रार्थनां कुरु—प्रभुः एव युष्मान् मार्गं दर्शयिष्यति।

महत् कार्यं कर्तुं प्रवृत्तस्य वस्तु-त्रयेण प्रयोजनं विद्यते; प्रथमतो

हृदयवत्ता—आन्तरिकता आवश्यकी। यूयं किं प्राणैः अवगतवन्तो यत् कोटिशो देवानाम् ऋषीणां च वंशधराः पशु-प्रायाः संवृत्ताः? यूयं किं प्राणैः अनुभवथ—कोटिशो लोका अनाहारेण म्रियन्ते, कोटिशो लोकाः शत-शताब्दीं व्याप्य अर्धाशनेन कालं यापयन्ति?...यूयं किम् एतत् सकलं चिन्तयित्वा अस्थिराः संवृत्ताः? एतद्-भावनया यूयं किं विनिद्राः सञ्जाताः? एषा भावना किं युष्माकं शोणितेन सह एकीभूता सती युष्माकं शिरासु प्रवाहिता भवति—युष्माकं हृदयस्य प्रत्येकं स्पन्दनेन सह एषा भावना किम् एकीभूता जाता? एषा भावना किं युष्मान् उन्मत्तान् कृतवती? देशस्य दुर्दशा-चिन्ता किं युष्माकम् एक एव ध्यान-विषयः संवृत्तः, अपि च तच्चिन्तया तन्मयाः सन्तो यूयं किं नाम यशः स्त्रियं पुत्रं विषय-सम्पत्तिम् अपि च शरीरम् अपि विस्मृतवन्तः? युष्माकम् एतादृशं किं संवृत्तम्? यदि सम्पन्नम्, अवगन्तव्यम्, युष्माभिः प्रथम-सोपाने—स्वदेश-हितैषि-भवनस्य प्रथम-सोपाने एव केवलं पदार्पणं कृतम् इति। एतद्-दुर्दशा-प्रतीकारार्थं कमपि उपायं निरूपितवान् असि वा? केवलं वृथा वाक्येन शक्ति-क्षयम् अकृत्वा कोऽपि सिद्धि-प्रदो मार्ग आविष्कृतो वा? मनुष्याणां निन्दनम् अकृत्वा तेषां यथार्थं किमपि साहाय्यं कर्तुं शक्नोषि वा? स्वदेश-वासिनाम् एतादृश-जीवन्मृतावस्था-दूरीकरणार्थं तेषाम् एतस्मिन् महति दुःखे किमपि सान्त्वना-वाक्यं श्रावयितुं शक्नोषि वा? किन्तु एतेनापि न संवृत्तम्। यूयं किं पर्वत-प्राय-प्रत्यूह-जातं तुच्छीकृत्य कर्म कर्तुं सन्नद्धाः स्थ? यदि अखिलं जगद् असि-हस्तं सद् युष्माकं विपक्षतया दण्डायमानं भवति तथापि युष्माभिः यत् सत्यतया अवगतम्, तद् एव कुर्वन्तः स्थातुं शक्नुथ वा?... स्व-मार्गतः अविचलिता न भूत्वा यूयं किं युष्माकं लक्ष्याभिमुखे



अग्रसरा भवितुम् अर्हथ? युष्माकं किम् एतादृशं दार्ढ्यं वर्तते? यदि एतद् वस्तु-त्रयं युष्माकं वर्तते, तर्हि यूयं प्रत्येकम् एव अलौकिक-कार्यं सम्पादयितुं शक्नुथ।

भाव-सङ्कल्पयोः यथा कार्यतया उपपादनं भवेत् तथा चेष्टध्वम्; हे वीर-हृदया महान्तो बालकाः! आप्राणं चेष्टध्वम्! नाम्नो यशसः तथा अन्यस्य कस्यापि तुच्छ-वस्तुनः कृते पृष्ठतो न प्रेक्षध्वम्। स्वार्थं पूर्णतया विसृजत तथा कर्म कुरुत।

अग्रत उपसर्प! अस्माभिः अपेक्ष्यते अनन्ता शक्तिः, असीम उत्साहः, असीमं साहसम्, असीमं धैर्यम्, तदैव वयं महान्ति कर्माणि कर्तुं शक्ष्यामः।

वत्स, अहम् इच्छामि एतादृशान् जनान्—येषां पेशयो लौह-समा दृढाः तथा स्नायवः आयसाः, अपि च येषां मध्ये एतादृशम् एकं मनः स्थास्यति, यद् वज्रोपादान-निर्मितम्। वीर्यम्, मनुष्यत्वम्—क्षात्र-वीर्यम्, ब्रह्म-तेजः।

सर्व-विषयेषु आज्ञा-वहतायाः शिक्षां कुरु; स्व-धर्म-विश्वासं मा त्यज, गुरुजनाधीनतया चलनं विना कदापि शक्तेः केन्द्रीकरणं न सम्भवति, अपि च एतादृश-विच्छिन्न-शक्तीनां केन्द्रीकरणं न क्रियते चेत् किमपि महत् कर्म न सम्भवति।

सावधानो भव! अस्मासु यथा कथमपि असत्यस्य प्रवेशो न स्यात्। सत्यं धारयन् तिष्ठ, वयं निश्चयेन कृत-कार्याः स्याम। विलम्बो भवेत्, किन्तु निश्चयेन कृत-कार्याः स्याम, एतद्-विषये नास्ति कोऽपि सन्देहः।...एतत् मनसि निधाय कर्मणि सन्नद्धो भव, यद् युष्माकं प्रत्येकस्य उपरि निखिलः कार्य-भारो न्यस्त इति।

नीति-परायणः साहसी च भव, हृदयं यथा सम्पूर्णं शुद्धं स्यात्। पूर्णतो नीति-परायणः तथा साहसी भव,—प्राण-भयम् अपि सावशेषं न रक्ष। धर्मस्य तत्त्व-विषये स्वं न उद्वेजय। कापुरुषा एव पापम् आचरन्ति, वीराः कथमपि पापं न कुर्वन्ति—पाप-चिन्ताया मनसि अपि स्फुरणस्य अवकाशं न ददते।

वस्तु-द्वयाद् विशेषेण सावधानेन भाव्यम्—क्षमता-प्रियता तथा ईर्ष्या इति। सर्वदा आत्म-विश्वासं साभ्यासं कर्तुं चेष्टस्व।

आदौ मनुष्य-निर्माणं कुरु। मनुष्यः अपेक्ष्यते। अपि च श्रद्धा न आयाति चेत् मनुष्यः कथं भविष्यति?

उत्तिष्ठ, जागृहि, स्वयं जागरितः सन् अन्यान् सर्वान् जागरितान् विधेहि, नर-जन्म सार्थकं कृत्वा गच्छ। 'उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत।'

## पञ्चमः अध्यायः

### भारतस्य भविष्यम्

भारतं किं म्रियेत? तर्हि जगतो निखिला आध्यात्मिकता विलुप्ता भवेत्; चरितस्य महान्त आदर्शा विलुप्ताः स्युः, निखिल-धर्मं प्रति मधुर-सहानुभूतिः विलुप्ता स्यात्, अखिल-भावुकताया विलुप्तिः भवेत्; तत्-स्थले देव-देवी-रूपेण कामिता विलासिता च युग्म-राजत्वं प्रचालयेत्; अर्थः—तत्-पूजायाः पुरोहितः; प्रतारणा, पाशवं बलं प्रतिद्वन्द्विता च तत्-पूजायाः पद्धतिः तथा मानवात्मा तस्य बलि-रूपः स्यात्। एतादृशी अवस्था कदापि भवितुं न अर्हति।

काल-चक्रं पुनः परावर्तितं सद् आगच्छति, पुनः भारतात् स शक्ति-प्रवाहो निर्गतः, यः अनति-दूर-काल-मध्ये निश्चयेन जगतो दूरतम-प्रान्तम् उपगच्छेत्। विश्वसिहि, विश्वसिहि, प्रभोः आज्ञा—भारतवर्षस्य उन्नतिः भविष्यति एव, जन-साधारणः तथा दरिद्र-जनाः सुखिनो विधातव्याः।

भारतं पुनः उत्थास्यति, किन्तु जड-शक्त्या न, चैतन्य-शक्त्या; विनाशस्य विजय-पताकाम् आदाय न, शान्ति-प्रेम्णोः ध्वजाम् आदाय—सन्न्यासिनः काषाय-वेश-साहाय्येन; अर्थ-शक्त्या न, भिक्षा-पात्र-शक्त्या।

अस्माकं कार्य-कलापाधीनं भारतवर्षस्य भविष्यम्। अदः पश्य, भारत-माता शनैः शनैः नेत्रे उन्मीलयति। सा कियत्-कालं निद्रिता

आसीत् केवलम्। अतो भारत-भविष्यम् उज्ज्वलं करणीयं चेत् तन्मूलं रहस्यम् एव एषा संहतिः, शक्ति-सङ्ग्रहः, विविधानाम् इच्छा-शक्तीनाम् एकत्र संहननम्। अपि च इदानीम् एव मम मनोनेत्राभिमुखम् ऋग्वेद-संहितायाः सः अपूर्वो मन्त्रः प्रतिभातो भवति—सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्। देवा भागं यथा पूर्वे इत्यादिः। यूयं सर्वे समानान्तःकरण-विशिष्टा भवत, यतः पूर्व-काले देवा एक-मनस्काः सन्त एव तेषां यज्ञ-भागं लब्धुं समर्था आसन्। ...एक-चित्तता एव समाज-निर्माणस्य रहस्यम्। एतदिच्छा-शक्ति-समूहस्य एकत्र सम्मेलनम्, एक-केन्द्रीकरणम्—एतद् एव रहस्यम्।

हे भ्रातृ-वृन्द, अस्माभिः सर्वैः एव इदानीं कठोरः परिश्रमः कर्तव्यः, नायं स्वपितुं कालः।

आदौ एव साक्षात् महत्यः परिकल्पना न उपस्थापनीयाः, शनैः शनैः आरम्भं कुरु। यद्-भूमौ दण्डायमानः असि सा कियद्-दृढा तद् अवगम्य अग्रसरो भव, क्रमेण उपरि उत्थातुं चेष्टस्व।

जागृहि, जागृहि, दीर्घ-रजनी प्रभात-प्राया। दिवालोको दृक्पथम् आयाति। महातरङ्गः समुत्थितः। कथमपि तद्-वेगं रोद्धुं न शक्ष्यति।

अस्माकं स्वकीय-मातृ-भूमि-कृते हिन्दुः तथा इस्लाम-धर्म इत्येतन्महामत-द्वय-समन्वय एव—वैदान्तिकं मस्तिष्कम् इस्लामीयं शरीरं च—केवलम् अभिलषितम्। अहं मानस-नेत्रेण पश्यामि, एतद्-विवाद-विशृङ्खला-भेद-पूर्वकं भविष्यं पूर्णाङ्गं भारतं वैदान्तिकं मस्तिष्कं तथा इस्लामीयं शरीरम् आदाय महा-महिम्ना तथा अपराजेय-शक्त्या जागरितं भवति इति।

पूर्वम् उक्तवान् आसम्, ब्राह्मण-क्षत्र-वैश्य-शूद्राः—चत्वारो



वर्णाः पर्यायेण पृथिवी-भोगं कुर्वन्ति। एतादृशः काल आयास्यति, यदा शूद्रत्व-सहित-शूद्र-प्राधान्यं भविष्यति, अस्यार्थः वैश्यत्वं क्षत्रियत्वं च लब्ध्वा शूद्र-जातिः यादृश-बल-वीर्य-विकाशं करोति तत्र, शूद्र-धर्म-कर्म-सहिताः सर्व-देशीय-शूद्राः समाजे एकाधिपत्य-लाभं करिष्यन्ति। तस्यैव पूर्वाभास-च्छटा पाश्चात्त्य-जगति शनैः शनैः उदिता भवति तथा सर्वे तत्-फलाफल-विचारं कुर्वन्तो व्याकुलाः सन्ति। समाजतन्त्र-वादः, नैराज्य-वादः, नास्तित्व-वाद इत्यादयो मत-वादा एतद्-विप्लवस्य अग्रगामि-ध्वजाः।

सुदीर्घ-रजनी प्रभात-प्राया इति प्रतीयते। महादुःखम् अवसित-प्रायम् इति प्रतीयते; महानिद्राया निद्रितो शवो जागरित इव भाति। इतिहासस्य विषयो दूरे तिष्ठतु, किंवदन्ती अपि यत् सुदूरातीत-घनान्धकार-भेदे असमर्था, तत एका अपूर्वा वाणी श्रुति-गोचरा भवति इव। ज्ञान-भक्ति-कर्मणाम् अनन्त-हिमालय-स्वरूपाया अस्माकं मातृभूमेः भारतस्य प्रतिशृङ्गं प्रतिध्वनिता सती सा वाणी मृदुना परम् अभ्रान्तेन वचसा कस्यापि एकस्य अपूर्वस्य राज्यस्य वार्ताम् आवहति इव। यावद् एव दिनानि यान्ति तावद् एव यथा सा स्पष्टतरा, गभीरतरा भवति। हिमालयस्य प्राण-प्रद-वायु-स्पर्शो मृत-देहस्य शिथिल-प्राये अस्थि-मांसे अपि प्राण-सञ्चारं करोति इव—निद्रितः शवो जागरितो भवति। तस्या जडता क्रमेण अपैति। यः अन्धः स न पश्यति; यो विकृत-मस्तिष्कः स न बुध्यति—अस्माकम् इयं मातृभूमिः गभीर-निद्रा-परित्यागं कृत्वा जागर्त्ति। न कोऽपि इदानीम् अस्या गति-रोधं कर्तुम् अलम्, न पुनः एषा निद्रिता भविष्यति—कापि बहिःशक्तिः एव इदानीम् एनां दमयितुं न शक्ष्यति, कुम्भकर्णस्य दीर्घ-निद्रा विभज्यते।

स (श्रीरामकृष्णः) यदा प्रभृति जन्म-ग्रहणं कृतवान्, तद्-दिनतः

सत्य-युगस्य आगमनं जातम्। इदानीं सर्वे भेदाभेदा गताः, आचण्डालं प्रेम प्राप्स्यति। स्त्री-पुंस-भेदः, धनि-निर्धन-भेदः, पण्डित-विद्वद्-भेदः, ब्राह्मण-चण्डाल-भेद इत्येतत् सर्वं सः अपाकृत्य गतवान्। अपि च स विवाद-भञ्जनः—हिन्दु-मोहम्मदीय-भेदः, खृष्टीय-हिन्दु-भेद इत्यादयः सर्वे व्यपेताः। असौ यो भेदाभेद-सङ्ग्राम आसीत् सः अन्य-युगीयः; एतत्-सत्य-युगे तस्य प्रेम्णः प्लावनेन सर्वम् एकाकारम्। श्रीरामकृष्ण इव एतावत्-समुन्नत-चरितः कस्मिन्नपि काले कोऽपि महापुरुषो न जातः। अतः तम् एव केन्द्रीकृत्य अस्माभिः सङ्घ-बद्धैः भाव्यम्; परं प्रत्येकस्य स्व-भावेन तद्-ग्रहण-सामर्थ्यं स्थास्यति—कोऽपि आचार्य इति वदतु, कोऽपि परित्राता इति, कोऽपि ईश्वर इति, कोऽपि आदर्श-पुरुष इति, कोऽपि वा महापुरुष इति—यस्मै यद् रोचते।

यदि एतादृशम् एकं राष्ट्रं निर्मातुं शक्यते यत्र ब्राह्मण-युगस्य ज्ञानम्, क्षत्रियस्य सभ्यता, वैश्यस्य सम्प्रसारण-शक्तिः तथा शूद्रस्य साम्यादर्शः—एतत् सर्वम् एव यथायथम् एव वर्तेत परम् एतेषां दोषा न स्थास्यन्ति, तथा सति तद् एकम् आदर्श-राष्ट्रं भविष्यति। अहं विश्वसिमि, सत्य-युगः समायातः। एतत्-सत्य-युगे एको वर्णः, एको वेदो भविष्यति तथा समग्रे जगति शान्तिः तथा समन्वयः पदं करिष्यतः। अस्य सत्य-युगस्य विचारम् अवलम्ब्य एव भारतं पुनः नव-जीवनं प्राप्स्यति। अस्मिन् विश्वासम् आधत्स्व।

उत्तिष्ठ वत्स-गण—अस्मिन् कर्मणि प्रवृत्तो भव।...सनातन-हिन्दु-धर्मस्य जयो भवतु। उत्तिष्ठ, उत्तिष्ठ वत्स-गण, वयं निश्चयेन जयं लप्स्यामहे।

नूतनं भारतं निर्गच्छतु। निर्गच्छतु हलं धृत्वा, कर्षकस्य कुटिरं भित्त्वा;



धीवराणाम्, सङ्कीर्ण-जातीयानाम्, चर्म-काराणाम्, खलपू-जनानाम् उटज-मध्यतः; निर्गच्छतु लघु-वणिजाम् आपणतः; भर्जनाजीवानां चुल्ली-पार्श्वतः। निर्गच्छतु कर्म-शालातः, हट्टतः, पण्य-वीथिकातः। निर्गच्छतु गुल्म-गहनतः, अरण्यतः, गिरि-पर्वततः। ...भो अतीत-कङ्काल-चय! इतः पुरतः तव उत्तराधिकारि भविष्य-भारतम्। असौ ते रत्न-मञ्जूषा, तव माणिक्याङ्गुरीयकम्—उत्सृज एतेषु, यावच्छीघ्रं शक्नोषि उत्सृज, त्वं च वायौ विलीयताम्, अदृश्यताम् आपतस्व, केवलम् उत्कर्णं तिष्ठ; यावद् एव तव अवलोपः, अनुपदम् एव श्रोष्यसि कोटि-जीमूत-स्यन्दिनं त्रैलोक्य-कम्पन-कारिणं भविष्य-भारतस्य उद्बोधन-ध्वनिम्—पुण्यो महान् गुरुर्विजयताम् इति।

उत्तिष्ठ, तस्य जागरणं विधेहि—अपि च, नूतन-जागरणेन नूतन-प्राण-दानेन पूर्वापेक्षया अधिकतर-गौरव-मण्डितं कृत्वा भक्ति-भावेन स्वस्य शाश्वत-सिंहासने तस्य प्रतिष्ठां विधेहि।

एतत्-सङ्कलित-पुस्तिकाया अध्यायाः सर्वे एव 'स्वामि-विवेकानन्दस्य वाणी तथा रचना' इति तथा History of the Ramakrishna Math & Ramakrishna Mission (1st Edition) इत्यतो गृहीताः।